In Public Domain. Digitized by eGangotri and Sarayū Trust Foundation Delhi.

# ॥ श्रीः ॥

# ॥ सुगमरामायणम्

रमेशचन्द्र शुक्लः

देववाणी-परिषद्, दिल्ली

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ॐ परमात्मने नमः
विनायक शर्मा
राजफापरी दुर्गा मन्दिर
पो०—बैकुण्ठपुर, सालुगाड़ा,
सिलीगुड़ी, पश्चिम बंगाल

[illegible]

29/7/18

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

# सुगमरामायणम्

(महाकाव्यम्)

प्रणेता

रमेशचन्द्र शुक्लः

प्रकाशिका

**देववाणी-परिषद्, दिल्ली**

९, वाणी-विहार, नई दिल्ली-११००५९

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

SUGAMARAMAYANAM
(Sanskrit Epic)
By Shukla, Ramesh Chandra
Price : Rs. 35. 00

REVISED PRICE

---

© □ डॉ० रमेशचन्द्र शुक्ल:
प्रकाशिका □ देववाणी–परिषद्, दिल्ली
६ वाणी-विहार:,
नई दिल्ली–११००५९
मुद्रक: □ मीनाक्षी मुद्रणालय:
उत्तमनगरम्
नई दिल्ली–११००५९
संस्करणम् □ प्रथमम्, अगस्त: १९७८ ई०
मूल्यम् □ पञ्चत्रिंशद्रूप्यकात्मकम्

REVISED PRICE २५ : ००



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| आमुखम् | : | डा० रमाकान्त शुक्लः | (ङ-च) |
| निवेदना | : | डा० रमेशचन्द्र शुक्लः | (छ-ज) |
| समर्पणम् | : | | २ |
| प्रथमः सर्गः | : | प्रस्तावना | ३-६ |
| द्वितीयः सर्गः | : | रामगुणानुवर्णनम् | ७-१० |
| तृतीयः सर्गः | : | रामविद्याध्ययनम् | ११-१५ |
| चतुर्थः सर्ग | : | विश्वामित्राय रामोपलब्धिः | १६-२१ |
| पञ्चमः सर्गः | : | शरच्छोभावर्णनम् | २२-२५ |
| षष्ठः सर्गः | : | विश्वामित्रयज्ञरक्षाताटकासुबाहुवधः | २६-३१ |
| सप्तमः सर्गः | : | रामादिशुभोद्वाहः | ३२-३८ |
| अष्टमः सर्गः | : | रामवनगमनम् | ३९-५५ |
| नवमः सर्गः | : | रामवनवासः | ५६-७७ |
| दशमः सर्गः | : | सुग्रीवसौहृदम् | ७८-१०५ |
| एकादशः सर्गः | : | लङ्कादहनम | १०६-१३५ |
| द्वादशः सर्गः | : | रावणवधः | १३६-१७४ |
| त्रयोदशः सर्गः | : | रामाभिषेकः | १७५-१९१ |
| चतुर्दशः सर्गः | : | सीतानिर्वासनम् | १९२-२१३ |
| कवि-परिचयः | : | | २१४ |
| शुद्धिका | : | | २१५-२१६ |




Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# आमुखम्

यत्प्रभापटलोद्भासा भासतेऽद्यापि भारतम् ।
दिव्यं तत्संस्कृतज्योतिरासंसार प्रकाशताम् ।।

**'देववाणी-परिषद्, दिल्ली'** इत्यस्याः संस्थायाः उद्देश्येषु सद्ग्रन्थानां प्रकाशनमप्यन्यतमं विद्यते । तदनुसारमाचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं **सुगमरामायणाख्यं** संस्कृतमहाकाव्यमिदं परिषदा प्रकाश्यते । महाकाव्यमिदं कविना १०. १. १९७८ ई. तारिकायां प्रारभ्य १७. ४.१९७८ ई. तारिकायां, रामनवम्यां, समाप्तम् । महाकाव्यसमाप्तिदिवस एव परिषदस्तत्त्वावधाने डॉ० राममुरेशपाण्डेयमहाभागानामध्यक्षतायां सुगमरामायणस्य प्रथमवाचनाय एका गोष्ठी अप्यायोजिताभूद् यस्यां कविमुखेनैव महाकाव्यस्य केचन अंशाः सहृदयैः श्रुताः, प्रस्तुतीकृताश्चैतद्विषये स्वविचाराः ।

चतुर्दशसर्गात्मकमिदं **'सुगमरामायणा'**ख्यं महाकाव्यं संस्कृतरामकाव्यपरम्पराया अनुपमं रत्नं, कवेर्व्यापकानुभवस्य सफलमभिव्यञ्जनं, भारतीयसंस्कृतेश्चारुचित्राणां मञ्जूषाभूतम्, सद्विचाराणां संघातस्थलम्, चारुकल्पनानामावासभूमिः, कवेर्नवनवोन्मेषशालिन्याः शेमुष्याः क्रीडांगणम्, भगवत्या गीर्वाणवाण्याः समुल्लासश्चेति निश्चप्रच वक्तुं शक्यते । महाकाव्येऽस्मिन् कविना यथा रामकथाया आबालवुद्धिग्राह्यं मनोज्ञमाख्यानं विहितम्, यथा च श्रीरामादीनां चरित्राणि प्रस्तुतानि, यथा च गभीरव्यापकजीवनानुभवोऽभिव्यक्तः, यथा च स्वविचारौदात्त्यसूचकानि सूक्तिरत्नानि जगते उपायनीकृतानि, यथा च महाकाव्यरचनायां परम्पराप्रयोगौ समाश्रितौ, यथा च मानवीयसम्बन्धानामादर्शनिर्वाहः प्रस्तुतः, यथा च शासकस्यादर्शरूपः संकलितः, यथा च लोकाराधनं सर्वोच्चत्वेन स्वीकृतम्, यथा च लोकजीवनस्य संस्कृतेश्चांकनं व्यधायि, यथा च सभक्तिभावं भगवान् स्तुतः, यथा च शब्दार्थगतं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रचनागतमन्यच्च तत्तद्वैशिष्ट्यमाविष्कृतम्, यथा च लोकोपकाराय सद्यःपरनिर्वृतिकान्तासम्मितोपदेशावभिव्यक्तौ तदेतत्सर्वमपि सचेतसां महते मोदायैवावतिष्ठते। सन्तिष्ठमानेष्वपि बहुषु रामकाव्येषु सुगमरामायणोपनिबन्धनं कवेः स्वोत्तरदायित्वनिर्वाहं स्वधर्मपरिपालनं च सूचयति। सहृदयहृदयावर्जकस्य संस्कृतानुरागिणां चेतामलिम्लुचस्य 'सुगमरामायणस्य' साहित्याध्येतॄणां, काव्यकर्तॄणां, काव्यश्रोतॄणां, काव्यानुरागिणां, काव्यपारगिणां च जगति समुचितः प्रसारः स्यादित्याकांक्षया देववाणीपरिषदास्य प्रस्तुतिरंगीकृतास्ति। श्रीशुक्लमहाभागैरस्य प्रकाशनं परिषदेऽनुमतमित्येतदर्थं परिषदेतेषामवमर्णत्वं बिभर्ति। परिषदः संस्थापकाध्यक्षत्वं सम्यक्परिपालयद्भिरेभिर्यथा तस्याः प्राणपोषणं कृतं तथैवाधुनापि क्रियते। परिषद्येतेषामहैतुकं निसर्गजं कारुण्यं सर्वथोपश्लोकनीयं विद्यते।

आशासे, महाकाव्यस्यास्य तत्तद्वैशिष्ट्योद्घाटनाय आस्वादनाय च सज्जाः भविष्यन्ति विद्वद्भिरश्चिद्दोपज्ञाः सहृदयगुणज्ञाश्चालोचकाः; साक्षात्करिष्यन्ति च रामकथामन्दाकिन्याः कमप्यभिनवमनुपमं च तरंगसंकुलं, गभीरं सुगमं च पुण्यप्रवाहम्।

कविवराणां देववाणीसमाराधनतत्पराणामाचार्यश्रीरमेशचन्द्रशुक्लमहोदयानां महाकवित्वसाधकं महाकाव्यमिदं भूयोभूयोऽभिनन्दन्नहं तेषां दीर्घायुष्यं सततसत्साहित्यरचनापरत्वं च कामये।

विदुषामाश्रवः

रमाकान्त शुक्लः
एम० ए०, पीएच० डी०,
साहित्याचार्यः, सांख्ययोगाचार्यः
महासचिवः
'देववाणी-परिषद्, दिल्ली'

६. वाणीविहारः
नयी दिल्ली—११००५९
श्रावणी सं० २०३५,
(१८. ८. १९७८)



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्री :

# अथ सुगमरामायणम्

## ★ प्रथमः सर्गः ★

१

श्रीरामं शरणं भजे रघुपतिं तं जानकीवल्लभं
धर्मं स्थापयितुं कृपामयमना यो मेदिनीमण्डले
मर्यादां परिपातुमत्र विमलं ज्ञानञ्च मुक्तिप्रदं
शीलाब्धिर्जनुरग्रहीत् सुचरितः श्रुत्युक्तवर्त्मश्रितः

२

जातः सूर्यकुले ह्यसौ सुविदिते वीरत्वज्ञानार्चिते
सन्नीतिप्रथिते सुतो दशरथक्षोणीपतेः शीलवान्
ज्येष्ठः शिष्ट ऋजुस्वभावरुचिरः शूरः सतामग्रणीः
आसीत्सोऽखिलमानवेष्वनुपमो विद्वान् सदाचारवान्

३

आसंस्तस्य विनीतचारुचरिता वीरा गुणद्योतिताः
आज्ञापालनतत्पराः सहृदयोपास्यास्त्रयश्चानुजाः
शत्रुघ्नो भरतश्च कीर्तिकलितो धर्मस्थितो लक्ष्मण
श्चत्वारोऽपि मनस्विनः प्रियतमा भूमण्डलस्याभवन्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



४

कौशल्या महिषी बभूव जननी रामस्य शीलाञ्चिता
अम्बाभूद् भरतस्य कैकयसुता भूख्यातशक्त्यर्चिता
शत्रुघ्नस्य च लक्ष्मणस्य सुमतिर्माता सुमित्राभवत्
तास्तिस्रोऽपि सुसेविता गुणगणैः राज्यो बभूवुः क्षितौ

५

श्रेष्ठक्षत्रियवृन्दवन्द्यनृपति धानुष्कधीरर्षभो
राजा मञ्जुलमानसो दशरथस्तेषां पिता गौरवं
संसारस्य नितान्तगेयचरितोऽभूत् सुन्दरं मङ्गलं
योद्धारः सकलाश्च तत्र निदधुः श्रद्धामजस्रं भृशम्

६

इक्ष्वाक्वादिमहीप पूर्वजकृतां स्वां राजधानीं प्रियां
विश्वख्यातमनोऽभिरामसुषमायोध्यामसौ भूपतिः
शत्रुध्वंसनदक्षकौशलधरो वीरोऽध्युवास स्वयं
तेजस्वी निजतेजसा स महता तेजोऽहिनद् वैरिणाम्

७

नो कश्चित्प्रबभूव तस्य बलिनः साम्मुख्यमेवापि च
कर्तुं वीरवरः कदापि तुमुले योद्धर्धरित्रीपतेः
दृष्ट्वा तं समराजिराद् भयवशात् क्षिप्रं पलायिष्ट सः
यातस्तस्य रथो दिशासु दशसु श्रेयःस्थचेतोजुषः

८

श्रुत्वा तस्य धनुःस्वनं बलवतः सर्वेऽनिशं शत्रवः
स्वप्राणान् परिरक्षितुं च सरयं हित्वास्त्रशस्त्राण्यपि
सञ्जाता बहुखेदयुक्तमनसोऽगुः कन्दरां भूभृत-
स्तन्वानः स्वयशोऽधिपो दशरथो लोके जुगोप प्रजाः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



९

राज्ये तस्य नृपस्य सर्वं जनता वासं च चक्रे मुदा
सासीत् पूर्णसमृद्धिवैभववती स्वस्था नितान्तोन्नता
ज्ञाने किञ्च गुणेषु सा कृतवती स्नेहं रुचिञ्चाधिकाम्
आचारे च कलासु शास्त्रनिवहेष्वासीत् तदीया रतिः

१०

सर्वे स्युः सुखिनो भवन्तु सुधियः सन्नीतिमन्तो जनाः
न स्यात् कोऽपि दरिद्रदीनकुमतिर्नो द्वेष्टृ कस्मिन्नपि
इत्येवं नितरामचीकमत सः क्षोणीपतिर्नीतिवित्
तस्मात् सः सुतरां तथैव कृतवान् यत्नं प्रकृष्टं गुरुम्

११

मेने लोकसुखं सदैव स नृपो नैजं सुखं सर्वथा
जानाति स्म जनान्स आत्मजनिभान्नित्यं मनीषी महान्
प्राणेभ्योऽप्यधिकानसावमनुत स्वीयांश्च तान् जीवने
नित्यं रञ्जनमेव शुद्धहृदयस्तेषां व्यधात् सादरम्

१२

सर्वा सा जनतापि तत्र निदधौ श्रद्धां नितान्तोज्ज्वलां
पित्रा तुल्यमसावमंस्त वसुधासम्राजमीड्यञ्च तं
राजा सोऽपि सदैव तिग्मधिषणः पृष्ट्वा प्रजां शासने
कार्याणि व्यदधाच्च यज्ञसुजनस्तोमस्तुतः शासकः

१३

लब्ध्वा तं जनकोऽधिपं दशरथं श्रेष्ठं स्वसम्बन्धिनम्
आत्मानं बुबुधे भवे सुकृतिनां मान्यं विदेहोऽपि सन्
रामः शम्भुधनुर्यदा जनकजापाणिग्रहायाभनक्
यो रामस्य पिताऽभवत् कथमसौ नो स्याद् विदेहादृतः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१४

श्रीराम: शरदश्चतुर्दश वने वासं विदध्यादथ
स्याद् राजा भरतोऽधिपं दशरथं कैकेयपुत्री यदा
स्वाभीष्टौ वनुते स्म चाग्रहपरा प्रत्याश्रुतौ द्वौ वरौ
सत्याराधनतत्परोऽवनिपतिस्तौ स्वीचकाराप्रियौ

१५

प्राणेभ्योऽप्यधिकं प्रियं दशरथ: श्रीरामचन्द्रं वनं
यातुं त्वादिशति स्म किन्तु नृपतिर्य: सत्यरक्षाप्रिय:
प्राणानां गमनं वरं वसुमतीभर्ता स मेने परं
प्रोक्तां कर्तुमसौ गिरं न वितथां स्वीयामियेष व्रती

१६

तत्पुत्र: किल रामचन्द्रभगवान् धर्मं जगत्यास्पात्
मर्यादापुरुषोत्तमोऽतुलबल: शीलस्य सिन्धुर्महान्
आज्ञापालनहेतुना निजपितु: कष्टानि सेहे वने
लोकाराधनकारणेन दयितां हित्वाप्यसौ जानकीम्

१७

श्रीराम: पतितेऽत्र मन्दधिषणे मूर्खेऽपि नित्यं कृपां
धत्ते स्मोद्धरते स्म दीनदलितं क्रूरात् समस्ताद् द्रुतं
दु:खेभ्यो विपदामसीमजलधेर्घोरादगौप्सीत् सदा
पूतं तस्य मयात्र चारुचरितं पापापहं गीयते

१८

भूयात् पुनर्भारतभूमिरेषा भव्या स्वकीये वचनेऽनुरक्ता
सा पालयेत्तत् कठिनेऽपि काले कृच्छ्रेऽपि जह्यान्न च सा स्वसन्धाम्

इति श्री रमेशचन्द्रशुक्लकृते सुगमरामायणाख्ये महाकाव्ये प्रस्तावना नाम

प्रथम: सर्ग:

Padma Shri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

धर्मं परं स मनुते स्म हि रामचन्द्र
आदेशपालनमथ स्वपितुश्च सेवां
दृष्ट: प्रतिक्षणमसौ नितरां निलीन-
स्तत्रैव लोकहितचिन्तकवन्द्यबन्धु:

११

रामस्य बन्धुषु कृपामयचित्तता सा
भक्तिश्च तस्य जननीषु समुज्ज्वला सा
ताते च सान्द्रपरमादरभावभव्या
तं सर्वथा गुरुतरां प्रियतामनैषु:

१२

लोकोदयार्थमनिशं च पवित्रभावं
बिभ्राणमेव तमवेक्ष्य च सर्वदा स:
क्षोणीपतिर्दशरथो नितरां ननन्द
वात्सल्यधीश्च ववृधेऽति हि तस्य तस्मिन्

१३

आसंस्त्रयोऽप्यतितरामनुजा: प्रियाश्च
रामस्य चित्तमृदुलस्य कृपामयस्य
प्रीतिं भृशं स निदधे निजबन्धुवर्गे
सस्नेह तेषु दयते स्म च तेष्वजस्रम्

१४

द्रष्टुं क्षमो न भवति स्म विषण्णचित्तं
प्रह्व: स्वकीयमतिकोमलमानस: स:
स्निग्धोऽनुजं कमपि राम उदात्तभाव-
स्तेषां हिताय सततं महतेऽयतिष्ट



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५

क्रीडास्वथो गुरुमना अनुजं स्वकीयं
प्रीत्या भवन्नपि जयी स्वयमेव मत्वा
बन्धुर्जयी स इति घोषयति स्म रामः
स्नेही भवेत् स इव बन्धुषु कोऽन्यबन्धुः

१६

भवेत् प्रिया भारतभूः पुनश्च
स्वबन्धुषु स्नेहमयी जगत्यां
स्पृहार्हवात्सल्य इव क्षमावान्
प्रख्यात – सूर्यान्वयजातरामः

इति श्रीरमेशचन्द्रशुक्लकृते **सुगमरामायणे** महाकाव्ये **रामगुणानुवर्णनं** नाम **द्वितीयः सर्गः**



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ तृतीयः सर्गः

१

नमामि रामं गुरुसेवनव्रतं
चरित्रचारु — प्रियसद्गुणस्तुतं
पितुश्च मातुर्हृदये सुखप्रदं
हृदा तदाज्ञापरिपालने रतम्

२

जगाम विद्यापठनाय सत्वरं
स्वबन्धुयुक्तः शुभमाश्रमम्प्रति
गुरोर्वसिष्ठस्य विनीतमानसः
कुमाररामो गुरुभक्तिबन्धुरः

३

गुरुं वसिष्ठं सह बन्धुभिः प्रियै
र्हृदापि वाचा क्रिययानुवासरं
भजंश्च भक्तया विनयेन सादरं
गुरुं प्रसन्नं कृतवांस्तपस्विनम्

४

गुरोर्विनेयश्चरणौ निपीडयन्
सदा तदाज्ञां परिपालयन् मुदा
गुरोर्हि सेवां करवाणि कामहं
नतो भवन् सम्प्रति स न्यवेदयत्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५

गुरोः स्वकीयस्य च गामुपास्य सः
सदा सपर्यावसरे च सादरं
पयः प्रसूनानि फलान्यथेवत
गुरुं सदर्भाः समिधः समर्पयन्

६

अवाप्तुमाज्ञां प्रतिवासरं गुरोः
तदाननं भक्तिमयेन चेतसा
विलोकयन् सः समतिष्ठतानुजैः
समं महीन्द्रस्य सुतो वशंवदः

७

प्रभातकालेऽनुदिनं समुत्थितो
गुरोः सदा प्रागनुशासनप्रियो
निशि प्रसुप्तो मतिमान् नृपात्मजो
बभूव रामः स्वगुरोरनन्तरम

८

वनं प्रयातः समिधः स्वबन्धुभिः
समं ग्रहीतुं सुकुमारविग्रहः
वहूनि सेवार्थमसौ गुरोर्मुदा
कुशादिवस्तूनि महीन्द्रशावकः

९

सहानुजैः सः परमावदातया
वसन् गुरोराश्रमपावनप्रिये
स्वसेवया भक्तिपरीतयादृता
मरुन्धतीं मातरमभ्यतूतुषत्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ द्वितीयः सर्गः

१

रामं नमामि तमहं नत मस्तकः सन्
स्नेहं प्रगाढमनुजेष्वनिशं न्यधाद् यो
भक्ति स्वपूज्यपितरि प्रवलां पवित्रां
स्वाम्बासु किञ्च महतीं नितरां प्रशस्ताम्

२

भक्ति न्यधात् तिसृषु सः समतावदातां
संश्लाघितामपि च पावनभावभव्याम्
अम्बासु मञ्जुलमनोज्ञ उदारचित्त
स्तासां सदैव चरणेषु नतिञ्चकार

३

श्रद्धा च तास्वतितरां सुदृढाभिरामा
दृष्टाभवद् सततमस्य वदान्यवृत्तेः
संवाव्रतो मधुरवाग् जननीत्रयस्य
सेवाममंस्त सुकृतं स निजं प्रसन्नः

४

पुण्यं महच्च शुभकर्म स आद्यधर्मं
मेने दिनेशकुलभूषणरामचन्द्रः
सेवामतः स विदधौ हि विना विलम्बं
तासामनन्तगुणचारुनिधिः शुभंयुः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५

रम्यैः स्वकीयचरितैर्हृदयप्रियैस्तै-
रप्रीणयत् स्वजननीः सकला विनीतः
अम्बाः विलोक्य मनसि प्रतिवासरं तं
प्रापुः प्रमोदमतुलं च विनोददिव्यम्

६

अज्ञासिषुः स्वतनुजादपि तं सदा ताः
प्रीतिप्रकृष्टकरतोषकरं महान्तं
तस्मात् तदीयहृदयं नितरामरज्यत्
स्नेहं प्रभूतमत एव दधुश्च तत्र

७

वत्सो यथा स्वजननीषु वभूव सान्द्र-
प्रीतिप्रदैः प्रतिदिनं सुखदः स्वकार्यैः
ताते तथैव परितोषकरः प्रदाता
नित्यं मुदां हृदयमोदविधायिनीनाम्

८

दृष्ट्वा पिता सरससद्गुणराशिशोभां
रामात्मजे कमललोचनचन्द्रवक्त्रे
उच्चैरलौकिकतया च समुल्लसन्तीं
जातः प्रसाद विपुलोवसुधामहेन्द्रः

९

वेलां दिनस्य न च तस्य कदाप्यपश्यन्
नैतादृशीं स हृदयं समतूतुषद् या
सः कामपि क्षितिपतिः स्वजनुर्व्यजानात्
तस्मान्नितान्तसुभगं प्रियरामहेतोः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

अबुध्यतासावनिशं स्वपुत्रवत्
अरुन्धती चापि कृपार्द्रमानसा
न्यधाच्च तस्मिन् हितभावमुज्ज्वल
मगाधवात्सल्यमयं मनोरमम्

११

अनेहसाल्पेन बभूव बन्धुभिः
समं स रामो धनुषि प्रधीश्वरः
कलासु विद्यास्वखिलासु सत्वरं
नयेषु वेदेषु च दर्शनादिषु

१२

यदा यदाभूच्च गुरोः शुभाश्रमे
विशेषशास्त्रार्थ – सभा – महोत्सव–
स्तदा तदोत्साहमयेन चेतसा
गृहीतवान् भागमसौ सहानुजैः

१३

अभूद् विजेता प्रतियोगिनां गणे
ययौ प्रशंसामुपहारमाप सः
समस्त – विद्यार्थि – समाजविश्रुते
महान् सुबोधः प्रतिभाविभूषितः

१४

निबन्धपाठे रचनासु सन्ततं
विशिष्टकाव्ये प्रथमञ्च बुद्धिमान्
पदं प्रबुद्धो लभते स्म संस्तुतं
जगाम शिक्षाभुवने महद् यशः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५

यथा प्रसिद्धिं स गतो भवाखिले
समग्र – साहित्यिक – कार्य – मण्डले
तथैव चेयुर्भरतश्च लक्ष्मणः
कुमारशत्रुघ्न इहाभिनन्दिते

१६

न केवलं तत्र च तत्र भारती—
कृपास्पदं भूपसुता हि ते तदा
समस्तशस्त्रास्त्रकलाप – संगर—
क्रियासु सर्वं प्रथमं पदं ययुः

१७

रणस्य या याः प्रतियोगिताः कृताः
बभूव रामः सह बन्धुभिस्तदा
धुरिस्थितस्तासु च तासु सन् सदा
प्रशस्तिपत्रैश्च स आदृतोऽभवत्

१८

बभूव शिक्षालयजीवनेऽनिशं
प्रशंसितश्लाघितवन्दितो भृशं
न तस्य साम्यं लभते स्म कोऽपि च
बभावसौ स्नातकमौलिभूषणम्

१९

अधीत्य विद्याः अनुजैः प्रियैः समं
गुरोरनुज्ञां च शुभाशिषां ततिम्
अवाप्य रामोऽधिपसौधमागतो
बभूव पौरैरखिलैस्तदादृतः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२०

समस्तराज्येन समर्चितोऽभवन्
नृपश्च राज्ञ्यो निखिला सुखं ययु:
वभूव देशोऽखिल एव हर्षवान्
गृहे गृहे वादनगीतयोऽभवन्

२१

पवित्रवृत्तो गुरुभक्तियुक्त:
शिक्षाजगद् गीतगुणप्रकर्ष:
भवन्तु विद्याव्यसनीव राम
श्छात्रा युवान: प्रियभारतस्य

इति श्रीरमेशचन्द्रशुक्लकृते **सुगमरामायणे** महाकाव्ये **रामविद्याध्ययनं** नाम
तृतीय: सर्ग:



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ चतुर्थः सर्गः

१

अनन्तभक्तिं निदधौ गुरौ यो
भूत्वा तदादेशपरः सदैव
पपाठ विद्याः सकला विनीतो
रामं नमामि प्रणतो भवंस्तम्

२

अधीत्य रामो निजराजधानीं
शिक्षालयात् सौम्ययुवाऽऽगमच्च
समागतः कौशिकतापसर्षि
र्नेतुं प्रियं राममितः कुमारम्

३

वीरेषु रामो युवसु प्रसिद्धो
वरेण्यधानुष्कयुवा स एको
यज्ञाः प्रवृत्ता भवितुं च शक्या
स्तदीयबाहु — प्रबलाश्रयेण

४

ज्ञात्वेत्ययोध्यां वसुधाधिपेन्द्र
मृषिः सहर्षं निकषाऽऽजगाम
वंशे रघूणां भुवि यज्ञ –रक्षा–
प्रभौ समुद्भूतमिनेन तुल्यम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चतुर्थः सर्गः

५

पिता हि रामस्य महीपमान्यो
नत्वार्षिराजं मनुते स्म धन्यं
भृशं स्वभाग्यं धरिणीपतित्वं
किञ्च स्वकीयं सफलं कृतार्थम्

६

चो बभाषे तमृषिं समर्च्य
प्रीत्याधिपः सादरमीड्यमेवम्
"ऋषे ऽघविध्वंसनलब्धदाक्ष्यं
दृष्ट्वा भवन्तं तपसाभिदीप्तम्

७

जन्माद्यजातं सफलं मदीयं
कुलं पवित्रं मम जीवनञ्च
सेवां विधातुं हृदयं बिभर्ति
ममाधिकामुत्सुकतां महर्षे

८

आज्ञास्ति कार्षे मम पालनीया
भवान् कृपापूर्वक मद्य वक्तु
यज्ञादिकं कृत्यकलापसर्वं
न वर्तते विघ्नगतं तु कच्चित् ?

९

तपांसि निर्विघ्नतया भवन्ति
प्रत्यूहयुक्तानि तपोवनानि
न सन्ति कच्चित्तु च कापि बाधा
ब्रूतां भवान् कौशिक मामिदानीम्"



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

आकर्ण्य वाचां नृपतेर्महर्षि--
महीप धन्योऽस्ति भवान् निधत्ते
चिन्तां तपो यज्ञतपोवनादा-
विति ब्रूवीति स्म तपोधनोऽसौ

११

जानातु राजन् न तपो मुनीनां
न यज्ञकार्यं भयविघ्नहीनं
नित्यञ्च दुष्टाः क्षणदाचरा हा
कठोरविघ्नान् विनिपातयन्ति

१२

तेभ्योऽस्ति कार्या भवता सुरक्षा
विना सहायं नृपते भवन्तं
कार्यं तपोयज्ञपरं कदापि
न सम्भवं ज्ञेयमिदं त्विदानीम्

१३

शिक्षा--तपः- संस्कृति-यज्ञ--धर्म—
नयादिभिर्देश उपैति सत्य
मुत्थान मङ्गल्य महीधृश्रृङ्गं
न संशयोऽल्पोऽपि भवानवेति

१४

राष्ट्रस्य शिक्षायजनादिकानि
विघ्नप्रगाढव्यथितानि सन्ति
भवन्ति यत्राद्य तपोवनेषु
नरेन्द्र तानि क्षितिधर्मरक्षिणम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५

शिक्षाप्रदाता यजनादिनिष्ठो
न चेद् धरित्र्यामभयप्रतिष्ठा–
युक्तश्च निश्चिन्तमना मनीषिण्
तदा महीशोऽस्ति जनापकारी

१६

चेद् हन्यते धर्मपथो जगत्यां
तदा न शान्तिः क्वचिदेव दृष्टा
सञ्जायते भ्रष्टचरित्रवन्तो
भवन्ति सर्वत्र जना मदान्धाः

१७

तस्माद् भवान् सादरमाग्रहेण
निवेद्यते यज्ञतपःस्थभक्तिः
सः स्यात् प्रयासोऽभिमतो हि येन
हता भवेयुः सकला मखघ्नाः

१८

सुतोऽस्ति रामस्तव सर्वथैव
संरक्षणे यज्ञविधेः समर्थ
स्तमद्य याचे क्षितिपं भवन्तं
कृपामय त्वं मम देहि राजन्

१९

निशम्य वाचं नृपतिर्महर्षेः
मेने स धन्यं स्वमहीपतित्वं
बभाण स ज्ञाननिधिं मुनीन्द्रं
भूपो मनीषी मधुरं मनस्वी

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२०

मदीयसूनुं यदि नाथ रामं
जानाति विद्वानुचितं समर्थं
तपोवनस्याखिल कार्यहेतोः
सप्रश्रयं तेऽद्य समर्प्यते सः

२१

कुमाररामो यदि यक्षरक्षा-
क्षमो भवेत् तं नितरां तदाहं
मन्येय सद्भाग्यजुषं च धन्य
माञ्चाधिकं कौशिक कोविदष

२२

यज्ञस्य रक्षा मम मुख्यधर्मः
समुद्यतोऽहं सुतरां तदर्थं
प्राणान् स्वकीयानपि हातुमस्मि
स्वजन्म यज्ञाय मतं ममेदम

२३

सुतोऽस्ति रामः परमप्रियोऽस्ति
प्राणानपि स्वान् नितरां हि तुच्छान्
ब्रवेमि विद्वन् मतिमंस्तदग्रे
यज्ञात् परो नास्त्यपि सः परन्तु

२४

यज्ञस्य रक्षार्थमहं महर्षे
भवद्विनेयं प्रहिणोमि रामं
सोऽस्ति स्वयं रक्षणकार्यहेतोः
क्रतोरलं वेद्मि गुरो तथापि

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२५

सेनानुगच्छेद् भवतो महर्षं
विधातुमर्चामुचिताम् अजस्रं
शिष्ये कृपां स्वां निदधातु विद्वन्
मयि स्वरामे च ममास्ति याच्ञा

२६

शासनाधिष्ठिता नायका भारते
स्युर्जनानां हिते तत्पराः सादरं
जीवनं देशसेवार्थमेवानिशं
योजयन्तु स्वकीयं मुदा सर्वथा

**इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये विश्वामित्राय रामोपलब्धिर्नाम चतुर्थः सर्गः**



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ पंचमः सर्गः

१

दशरथात्मज — रामकृपा — मयं
रघुकुलोद्भववीर ---- शिरोमणिं
भवहितैकधियं वुधभूषणम्
अमितशक्तिनिधिं शरणं श्रये

२

अनुज — लक्ष्मणवीरवरानुगः
सविनयं पितुरंध्रिसरोरुहं
शुचिमति ह्यभिवंद्यगुणोदधी
रघुपतिर्गुरुणा सह सोऽगमत्

३

पथि विलोक्य मनोहरदर्शनां
प्रकृति पेशल-पावन –दिव्यमां
दिशि दिशि स्थितभव्यशुभप्रभां
मुदमगादति राममनोऽमलाम्

४

मृग – सुशोभित – शाद्वलपेशलं
शिखि – समूह – कृतध्वनिगुञ्जितं
विविध – पुष्कल – पक्षि – गणाकुलं
वृषभवन्धुर – धेनु – मनोरमम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५

प्रकृति सौम्य कृषीवलमण्डितं
श्रमरत — प्रमदावलिभूषितं
रुचिरनूतन — सस्यधरार्चितं
लघुलघूटज — पंक्तिसुसेवितम्

६

पृथुकराजि — निनादसमावृतं
गुरुवटुस्थिति — वर्धितगौरवं
नवलताधरणीरुह — पूजितं
वनमदो वहु राममनन्दयत्

७

मधुर — सौरभवारिजवन्दिता
भ्रमर – गुञ्जित — चित्तहरस्तुता
सलिल – निर्मल – शुभ्रतरङ्गिणी
प्रियतमं रघुनाथमतोषयत्

८

बहुलभूमिरुहावृत — विग्रहः
प्रचुरचारु – वनस्पति – चर्चितो
हितकरौषध – शृङ्ग – समुच्छ्रितो
ऽवनिधरोऽधिप – वत्स – ममोदयत्

९

मुनिगणाश्रम – पावन – रम्यता–
जनितमोदकुतूहल – गौरव—
श्रितरमा मुदमातनुते स्म च
वसुमतीरमणात्मज – मानसे



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

क्वचिदति–प्रिय–मोनयुतं सरः
क्वचिदगाध – महावन – सान्द्रता
क्वचिदमुं वसुधाधर – कन्दरा
रविकुलोद्भव – राममतूतुषन्

११

विविध– चित्रविचित्र– सुगन्धभृत्–
कुसुमभूषित – भूरुहवल्लरी–
सुललितोपवनप्रिय — मञ्जुता
कमल–लोचन – राममसेवत

१२

उपवन — स्थितभूरिफलोल्लस—
तरुसमुच्चयनव्य – विभोत्तमा
दशरथात्मज –राम —मनोऽभजत्
प्रतिदिशं वितताnupमा शरत्

१३

वसुमतीधर –निर्झर –रम्यता
मधुरतद्गत – शब्द — सुपेयता
परम –निर्मल –तद्गति –नीर-मा
सरसिजानन – राममनूनुदन्

१४

अवनि–निर्गत– तोय — महाच्छता–
मधुरिमापि च रामधनुर्धरम्
अतुलशौर्यधरं रविवंशजम्
अभजताभजता मपकारकम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१५

क्षितिधरोभयमध्यगताध्वनः
परमभीषणदुर्गमदीर्घता
प्रचुरहिंस्रभयङ्करयुक्तता
जलधितुल्यविभावृतलम्वता

१६

जलनिधिप्रियसुन्दरताधिका
सितसितांशुचयं दधती भृशं
प्रचुरविस्तृतभूरसि संस्थिता
वितरतिस्म च रामकृते सुखम्

१७

विजितसिंहबलं बृषकन्धरं
परमदीर्घमुरो दधतं दृढं
भुजविशालरणाद्भुतकौशलं
प्रकृतिमंवमसेवत राघवम्

१८

अनुजलक्ष्मणराम उपेयिवान्
विदितकौशिकपूतशुभाश्रमं
स मनुते स्म तदा निजजीवनं
सुकृतिपावनधन्यतमं भुवि

१९

भारतस्य तरुणाः शुभार्थिनो
रामचन्द्र इव सादरं गुरो
रर्चने विदधतु स्वजीवनं
व्यापृतं भृशसुखेन सन्ततम्

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये शरच्छोभावणनं नाम पञ्चमः सर्गः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ षष्ठः सर्गः

१

यः स्वभारतमहीमहिमानं
संररक्ष निज बाहुबलेन
धर्मकर्मविमुखाधम पुंभ्य
स्तं नमामि रघुनन्दनरामम्

२

लक्ष्मणेन सह रामकुमारः
प्रातरेव शयनं परिहाय
नित्यकर्म निखिलं च विधाय
कौशिकं मुनिवरं निजगाद

३

"दारुणं परमनीरसमेतत्
काननं हि जनयत्यतिखेदं
कारणं वदतु मान्यमहर्षे!
मानसं भजति नो मम शान्तिम्"

४

"श्रूयतामिह पुरा प्रियवत्स
शोभिताः समभवन् सुखभाजः
सुन्दरा जनपदा हि करूषाः
श्रीजुषश्च मलदा अतिरम्याः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५

सुन्ददैत्यदयितातिकठोरा
ताटका गजसहस्रबलाढ्या
यक्षिणी जनपदानहिनत् तान्
ते ययुर्गतिमिमां दयनीयाम्

६

तत्सुतो विपुलशौर्यकठोरो
नाम माप्रथमरीच इहत्यान्
तांश्च नाशमनयद् हतभाग्यो
दूयते मम वदन्निति चेतः

७

दैत्यसुन्दरमणी बहुवीर्या
सा च तद्दुरितलग्नतनूजो
नाद्य तौ विरमतोऽपि कठोरात्
कर्मणः शृणु रघूत्तमवत्स

८

प्रत्यहं प्रचुरविघ्नकरौ तौ
यज्ञकर्म न तपो न सपर्यां
नापि चाध्ययनमेव तपस्वी
कर्तुमर्हति हि सम्प्रति कोऽपि

९

स्त्रीवधे न च कुरुष्व घृणां त्वं
लोकरक्षणहिते हननीया
धर्मपालनपरेण नृपेण
पापलिप्तवनितापि नृशंसा''



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

"ज्ञानयज्ञतपसां च हिताय
धेनुविप्रपरिरक्षणहेतो
रुद्यतोऽस्मि वचनं तव पातुं
पूज्य कौशिकमुने प्रभविष्णो

११

घ्नन्ति ये निरपराधमनुष्यान्
मारयन्ति ऋषियज्ञतपःस्थान्
धेनुविप्रपरिपीडनलिप्तान्
नाशयेयमहमाश्वखिलांस्तान्"

१२

क्षिप्रमेव कथयन्निति रामो
ज्यारवं विहितवानतितीव्रं
नादयन् प्रतिदिशञ्च नभः सः
प्राणिनोऽपि कृतवान् भयभीतान्

१३

ताटका भयमवाप परन्तु
गच्छति स्म च ततोऽमितमन्युं
धावति स्म रजनीचरभार्या
राघवस्य दिशि निर्दयचित्ता

१४

ताटका भृशमपातयदेव
क्रूरपांसुमधिकं रणभूमा
वश्मवृष्टिमपि तत्र चकार
यक्षिणी कृतवती बहुमायाम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१५

यज्ञनाशनपरार्षिनिहन्त्री
दर्शितातुलबलाधमकृत्या
रामचन्द्रशरविद्धशरीरा
राक्षसी गतवती परलोकम्

१६

ताटकानिधनमीड्यमुनीशं
भूरिहर्षमनयच्छुचिचित्तं
प्राददात् स मुदितोऽस्त्रबहूनि
शिक्षितं सपदि तत्र चकार

१७

कौशिकस्तत उपेत्य महर्षिः
स्वाश्रमं कथितवांश्च जिघृक्षु
लक्ष्मण रघुपति प्रियदीक्षा
मस्मि साम्प्रतमहं यजनाय

१८

दीक्षितो रघुपते धृतमौनः
स्यां यदा षडपि रात्रिदिनानि
यज्ञरक्षणपरौ हि भवन्तौ
सर्वथैव भवताञ्च कुमारौ

१९

राक्षसौ प्रखर कल्मषलग्नौ
शोचनीयतरशौर्यमदान्धौ
यज्ञनाशनकृते प्रयतेतां
रक्षतां क्रतुमुभाविह ताभ्याम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२०

रक्षणाय यजनस्य महर्षे
स्तत्परावभवतां बलवन्तौ
सावधानहृदयौ मतिमन्तौ
क्षत्रियौ दशरथात्मजवीरौ

२१

अध्वरो मुनिजनैर्विधिनिष्ठैः
सम्प्रवर्तित इतश्च सुबाहुः
स्वानुगैरित उपेत्य च साकं
यज्ञविघ्नकरमान्वितरीचः

२२

तावुभौ परुषराक्षसदुष्टौ
ध्वंसनाय मखपुण्यविधीनां
रक्तपातमतितीव्रमकार्ष्टां
सर्वतो व्यतनुतामपि मायाम्

२३

लक्ष्मण हि विदधन्निजबन्धुं
सावधानमवदद् रघुनाथो
विघ्नकारिपललाशिमदान्धा
आगता अतिशयाधमकार्याः

२४

"तानहं सकलपामरनिन्द्यान्
क्षिप्रमेव निहतांश्च करिष्ये"
उद्यतोऽभवदसाविति शंसन्
प्राक्षिपन्निजशरानतितिग्मान्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

क्रुद्धचित्तरणघस्मररामो
राक्षसात्यधममायुतरीचं
प्राक्षिपत् सपदि सागरनीरे
सद्य एव च जघान सुबाहुम्

२६

यज्ञविघ्नकरराक्षसवृन्दं
पापकर्मरततुच्छनिकृष्टं
सर्वमेव च जिहिंस स रामः
पूजितो मुनिवरैश्च समस्तैः

२७

पालिता गुरुगिरा च कृतार्थः
आश्रमेण सह राघव नूनं
वीरमौलिमुकुटाहमिदानी
वत्स राम विहितोऽस्मि यशस्विन्

२८

उत्साहश्रितमनसः सदैव भूत्वा
सन्मान्यान् स्वगुरुजनान् प्रमोदयन्तः
प्रत्यूहान् नवतरुणाः प्रणाशयन्तो
भूत्वा राम इवाऽनिशं जयन्तु

इति रमेशचन्द्रशुक्लकृते **सुगमरामायणे** महाकाव्ये **विश्वामित्र-यज्ञरक्षा-ताटका सुबाहुवधो नाम षष्ठः सर्गः**

●


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ सप्तमः सर्गः

१

दशरथसुतं रामं ज्ञानार्णवं बलसागरम्
ऋषिमुनिसुधीमान्यं दीनप्रियं करुणास्पदं
सुकृतिकुलसेव्यं पापध्वंसनोचितपौरुषं
सकलजगतीमर्यादारक्षणक्षममाश्रये

२

उषसि विनिवृत्तः सौम्यौ बन्धुना सह सादरं
नियतनिखिलार्चाकार्येभ्यो मुनेः सविधे ततः
कमलनयनो विश्वामित्रस्य दर्शनहेतवे
हतसकलविघ्नो वीराराध्यराम उपस्थितः

३

ऋषिमुनिमतो विश्वामित्रः शशंस शुभाशिषा
युवकतिलक ! श्रीराम! ज्ञानधाम ! महाभुज !
बहुलमुनिभिः सार्धं श्रेष्ठां प्रियां मिथिलापुरीं
त्वमपि चल यास्यामो द्रष्टुं विदेहकृतं क्रतुम्

४

त्रिनयनधनूरत्नं घोरं महाद्भुतशक्तिमत्
प्रचुरबलवन्तोऽस्ति ख्याता महारथिनो भटाः
कथमपि न तस्योत्थानं कर्तुमैशत तत्र च
नृपतिसुत योग्यं द्रष्टुं तन्निभालय राघव

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५

इति मुनिश्वरश्चोक्त्वा रामं समं मुनिभिस्तत
उपनतवनाधिष्ठात्र्याज्ञस्तपस्विवुधोऽचलत्
निशितमतिभि र्ब्रह्माख्यान प्रियैः सह सादरं
तमृषिमनुजग्मुस्तेजोऽब्धि मनस्विन उत्तमाः

६

प्रकृतिबहुदृश्याणां शोभां मनः प्रियमंजुलां
घनविपिनपृक्तां श्रीवन्द्यां नृपात्मजराघवो
तरलतटिनीतुङ्ग क्षोणीधरादिपरम्परां
सुखदसुषमापूर्णां पश्यन् ययौ मिथिलापुरीम्

७

हृदयसुखदा रम्या शुभ्रा जितेन्द्रपुरीरमा
रघुपतिमनोऽत्यन्तं दिव्या जहार सहर्षिभिः
स्वगुरुवरविश्वामित्रेणान्वितो मिथिलापते
रकुरुत निवासं शालायां क्रतोः रघुनन्दनः

८

क्षितिपजनकः श्रुत्वा हृष्टो विदेह ऋषेस्तदा
बहुमुनिवरैः साकं विद्योदधिर्हृदयोज्ज्वलः
सुविदिततपो विश्वामित्रस्य राममहीयसा
दशरथतनूजेनप्रीतं शुभागमनं ह्यभूत्

९

द्विजवरशतानन्दं कृत्वा पुरोजनकोऽधिपो
द्रुतमृषिवरं विश्वामित्रं यथाविधि सादरम्
अमहयदसौ भक्त्या रामं विलोक्य च सानुजम्
अगमदधिकां प्रीतिं सान्द्रां मलीमसमन्मथम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१०

ऋषिनिवहवंद्यं प्रेक्ष्य श्रीमुनीश्वरतापसं
मम सकलमेवेदं राज्यञ्च जीवनमामकं
सफलमथ धन्यं संस्तुत्यं दयामयमानस
चलतु कृपया सौधं सर्वं करोतु च पावनम्

११

तरणिकुलसम्भूतो रामोऽपि पश्यतु कार्मुकं
शिवभगवतः कर्तुं सज्यं न कोऽप्यजनि क्षमः
मुनिवर ! सुता मे सीता तं विधास्यति वल्लभम्
इह जगति सज्यं चापं यः करिष्यति शौर्यवान्

१२

प्रमुदितमना विश्वामित्रस्तथास्त्विति चावदत्
नृपजनकचेतः संलेभे मुदं महतीं गतः
स्वगुरुवचसा च श्रीरामः पुरीमनुजान्वितः
इव जगति नाकोऽन्यो द्रष्टुं स्थिता भवति स्म या।

१३

हृदयसुखदा मुक्ताभूषासुशोभितकामिनी
परमरुचिरा पीताभैर्हेमनिर्मितभूषणै
र्ललिततररूपा सा भव्या पुरीव शुचिस्मितं
भृशमरमयन्मोदाह्लादैः सलक्ष्मणराघवम्

१४

धवलधवलप्रासादोच्चाः प्रियद्युतिदीर्घिकाः
विमलविमला वीथ्यो रम्याः सुचारुचतुष्पथाः
विविधविपणीनां सौन्दर्यं नवापणमञ्जुता
रुचिरसलिलाधाराधाराः प्रकाशकदीपकाः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१५

अचनिरुहसान्द्रच्छायोद्यानभासुरपंक्तयः
शिशुतरुणवृद्धानां चेतोविनोदनसाधनं
प्रियललितमार्गाणां चैवं विशालसुविग्रहाः
प्रचुरतरसद्यन्त्रागारा रुजापहसद्गृहाः

१६

गुरुगुरुतराः शिक्षाशालाः पयप्रदधेनव
श्छविनवयुजश्चित्राः सौधाः प्रधीगणमण्डिता-
धिकरणनवानां भव्याभा सुपुस्तकमन्दिरम्
अभिनवशुभं देवस्थान कुमारमतोषयन्

१७

श्रुतिमधुरपाठो वेदानां क्वचिच्च महाञ्छ्रुतः
शकटशकटीनां सन्दोहश्चमूमहती क्वचित्
क्वचिदपि च शास्त्रार्थस्तेन श्रुतो बहुविस्तारः
विविध बहुशस्त्राणां संघः क्वचिच्च विलोकितः

१८

ध्वजवसनमुक्तालङ्कारै रलङ्कृतपेशलं
नृपतिगणरम्य सीतायाः स्वयवरहेतुना
रचितमथ रामो विश्वामित्रयुक्त उपेयिवान्
अनुजसहितः शूराग्र्यः शम्भुकार्मुकमण्डपम्

१९

सकलवसुधाधीशाः क्षोणीपराजकुमारकाः
दशरथसुतज्येष्ठं रामं विलोक्य रवेः पुरः
मलिनरुचिमन्तो जायन्ते यथाखिलतारकाः
झटिति मलिना जाताः सौमित्रिबन्धुयुतं तथा



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२०

सदसि विदधुर्घोषं चोच्चैर्महीशविदेहजा
अनुगनियता वीरः शैवं विधास्यति कार्मुकम्
अपरिमितशक्तिः सज्य यः क्षमातनया ध्रुवं
सुकृतितिलकं तं धन्यं सादरं हि वरिष्यते

२१

अजनिषत शब्दा स्तूर्याणाञ्च मंगलगीतयः
शुभपरिचयं नीता भूपास्तदा च निवेदिताः
अवनिपतयः कर्तुं सज्यं प्रयासभृशाधिकं
न परमभवन् साफल्यश्रीवृता बलविश्रूताः

२२

तरणिकुलजातः श्रीरामो गुरोरधिगम्य तद्
दशरथसुतोऽनुज्ञां चापं शिवस्य महाद्भुतं
अनुपमबलः कर्तुं चारोपितज्यमथोत्थितः
ऋषिमुनिविदेहादीन् विद्वत्कुलं बहु नन्दयन्

२३

अधमशठनिन्द्यान् दुष्टान् सोऽतिभीतिकरीं स्थितिं
भृशविपुलशोकानां स्थानं नयन् रघुनन्दनो
द्विरदवरगत्या गच्छज्जानकीहृदये मुदां
विधुवदन उत्पत्तिं कुर्वन् बभञ्ज शरासनम्

२४

धनुषि सति भग्ने संसारे सताञ्च महात्मनां
सुकृति बुधसत्स्वान्तस्थानां प्रमोदनदोऽवहत्
गुरुतररयांश्चर्याह्लादान् गतं हि चराचरम्
शुभमनुभवं देवा जग्मुर्मही सुखमभ्यगात्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२५

दिशि दिशि च शङ्खानां शब्द: प्रभूतसुखप्रद–
विविधबहुतूर्याणां पेयो बभूव तत: स्वन:
प्रियमधुरगीति: पुर्यां तत्र यत्र निरन्तरं
ललितगणिकानां नृत्यानि प्रियाण्यभवंस्तदा

२६

मुदितजनको राजा क्षिप्रं स्वदूतवरांस्ततो
दशरथनृपस्याभ्याशे प्राहिणोच्च शिवप्रिय-
परमसुखसन्देशं दातुं द्रुतञ्च महीपतिं
सह परिजनै: स्वैरानेतुं विनीतनतो भवन्

२७

हृदयसुखदं तं सन्देशन्तु कोशलभूपति:
सकलजनतामान्यो ज्ञात्वागमद् विपुलां मुदं
स्वजनमहिषीबन्धुस्तोमो जनाश्च ययु: सुखं
परमकमनीयायोध्याऽभूत्पुरी समलङ्कृता

२८

सपरिजनभूप: प्रस्थानं चकार च सत्वरम्
अखिलककुभस्तूर्याणामुच्चसान्द्ररवेण च
बहुविविधयानोपादानै: समं परिपूरयन्
जनकनगरीं पूर्णानन्दस्थमानस आगमत्

२९

क्षितिपजनक: प्रोत्या प्रत्युज्जगाम सबान्धव:
दशरथधरेन्द्रं प्राज्यै: साधनैरमितै: शुभै:
श्रुतिविधिविधानज्ञै: राजा सुखी च महर्षिभि:
सुभगसुतरामस्यासौ सन् विवाहमचीकरत्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३०

प्रकृतिमृदुरामः सीतामूर्मिलामथ लक्ष्मणः
सुरुचिमतिरास्तां द्वे पुत्र्यौ कुशध्वजभूभृतः
अनुजभरतस्तत्रैकां सौम्यसुन्दरमाण्डवीं
श्रुतसुभगकीर्तिं शत्रुघ्नश्चकार निजप्रियाम्

३१

शिवभगवतश्चापं रामो बभञ्ज धनुर्धरः
इति परशुरामस्य स्वान्तं निनाय भृशं शुचं
भवविदितशौर्यो योद्धुं प्रस्तुतः समजायत
ह्यगमयदमुष्य क्रोधं तं शमं निजतेजसा

३२

दशरथनृपस्यातिप्रेम्णा भृशं कृतवान् प्रियं
नृपतिजनकः सत्कारं सम्पदा निधिनूतनैः
स्वपुरगमनं चक्रे प्रीतश्च कोशलवासवः
क्षितिपजनकं भूयः सः श्लाघमान इनोपमः

३३

जायेरन् देशे युवानोऽस्मदीये
तेजःसम्पन्ना महाशक्तिमन्तो
जेतारोऽन्येषाञ्च यूनां समेषां
तुल्याः श्रीरामेण लोके समस्ते

इति श्रीरमेशचन्द्रशुक्लकृते **सुगमरामायणे** महाकाव्ये **श्रीरामादिशुभोद्वाहो** नाम सप्तमः सर्गः

●


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ अष्टमः सर्गः

१

लोकाराध्यं दशरथसुतं दीनबन्धुं शरण्यं
मर्यादाया जगति सततं पालकं न्यायनिष्ठं
भक्तोद्धारोचितबलजुषं मातृपित्रोरनुज्ञा–
रक्षालग्नं सदयहृदयं रामचन्द्रं नमामि

२

सर्वायोध्या निखिलभरतोर्वी च जाता प्रसन्ना
दृष्ट्वा सूनून् कृतिपरिणयान् राष्ट्रभूवासवस्य
लोको भूत्वा मुदितहृदयो भूषणैर्मौक्तिकैश्च
वस्त्रैश्चित्रैर्विविधबहुभिर्वैजयन्तीविभाभिः

३

रम्यैः पुष्पैर्ललितलतिकाभिश्च दीपप्रकाशैः
पूर्णं राष्ट्रं रुचिरकलशैर्मंगलैस्तोरणैश्च
चक्रुः प्रीत्या दिशि दिशि भृशं भूषितं दिव्यरूपं
राजानं तत्तनुजसकलानार्चदत्यन्तभक्तया

४

भूयो भूयो मधुरमधुरश्लोकगीतैः प्रभूतै
र्भव्याभाभिः परमसुभगश्रीस्थनो राजनाभो
राज्ञ्यः सर्वा मुदितहृदयाः सर्वसूनूंः स्नुषाश्च
हर्षोत्फुल्लाः प्रणतनिटिला राजभृत्यैर्जनैश्च



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५

पौरैः साकं द्विजवरसुधीमंगलाचारविज्ञै
नृ त्यज्ञाभिर्नगरगणिकाभिश्च तूर्यप्रवीणै
र्नानामोदैर्विविधगुणिभिस्ता उपावीणयंश्च
युक्तं सर्वं नृपतिभवनं राजधानी च सर्वा

६

यातैः कैश्चिद् दिवसमधुरैर्भूपती राजपुत्रं
रामं ज्येष्ठं नगरजनताप्रार्थनाभिश्च शीघ्रम्
ऐच्छत् कर्तुं विनयगुणिनं राजसिंहासनस्थं
शस्त्रास्त्रज्ञं जनगणमतं नीतिविद्यादिविज्ञम्

७

प्रादादाज्ञां झटिति तिलकोद्देश्यसज्जां विधातुं
सर्वो देशः सकलनगरी क्षिप्रमेवाभवच्च
श्रेष्ठश्रेष्ठैर्नवनवविधैर्बन्धुरैस्तैर्विचित्रैः
जाता रम्या करणनिचयैर्नेत्रचित्तप्रिया च

८

तस्मिन् काले भरततनयो मातुलागारयातः
आसीत् तस्मात् कुटिलहृदया मंथरा नाम दासी
कैकेयीं स्वां भरतजननी स्वामिनीं विप्रलेभे
सा सेहे नो नृपतिरचितं रामराज्याभिषेकम्

९

जाते रामे धरणिरमणे भीषणा आपतेयु
स्तस्यां तस्या भरततनये चापदः कष्टदात्र्य
स्तस्माद् राज्ञो ह्यभिमतवरौ पूर्वदत्तौ तयाद्य
ग्राह्यौ दैवान्निगदितवचस्तत् तदा सानुमेने


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०

जाता राज्ञी भरतजननी मन्युनिर्बन्धलग्ना
राज्ञा चान्यैर्बहुविधतया प्रार्थिता चानुनीता
दुर्दैवात् सा निजमभिमतं नो जहावाग्रहस्था
हाभूत् तस्मान्महसि च शुभे वज्रपातो मनोज्ञे

११

आसीद् भूपो वचनसुदृढो बाधितोऽभूत् प्रदातुं
दत्तं तस्यै वरयुगलकं पुत्ररामम्प्रति स्व-
प्राणश्रेष्ठं विपिनगमने दत्तवान् स्वामनुज्ञां
दुःखादस्मात् सपदि नृपतिस्त्यक्तवान् जीवन हा

१२

यातः स्वर्गं दशरथ इतः काननं रामचन्द्रो
यातौ सार्धं जनकतनया लक्ष्मणश्चापि तेन
चेतो नासीदनुजभरतः सोऽपि मातामहस्य
सद्मस्थोऽतोऽभवदतितरां राजधानी विषण्णा

१३

क्षिप्रं दूतान् भरतसविधे प्राहिणोच्छ्रीवसिष्ठो
नो वक्तव्यं किमपि तरसा सोऽत्र तूष्णीं भवद्भिः
आनेतव्यो मुनिवर इति प्रोक्तवांस्तांस्तदानीं
तस्याभ्याशे गरुडगतिकास्तेऽपि चाप्ता बभूवुः

१४

तत्रासाद्य प्रणिधिनिवहश्चादरेणाचचक्षे
पूज्यर्षिस्त्वां महिमरुचिरं क्षिप्रमेवाजुहाव
तं व्याहृत्येत्यतुलबलमानीतवांश्चारसंघः
सः स्वायोध्यां भरतसुमतिं भूपसूनुं सुधीन्द्रम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५

चिन्तामग्नो भरतमतिमान् राजपुत्रः प्रपेदे
चेतोऽयोध्यामगमदटवीं रामचन्द्रस्ततश्च
सौम्यो नम्रः प्रकृतिसरलः सीतया लक्ष्मणेन
भक्तो मातुः शुचिरपि पितुः शीलवान् सार्वमीड्यः

१६

मर्यादाभृन्नयपथगतो जाह्नवीमाजगाम
तामार्चीत् सः प्रणतनिटिलः स्नातगात्रो हि भूत्वा
पापौघानां पटुतमबलां ध्वंसने सेव्यसेव्यां
विद्याबुद्धिप्रदशुभजलां पावनीं पावनानाम्

१७

विद्वद्वंद्यव्रजमुनिमहात्मर्षिसिद्धप्रबुद्ध-
योगिस्तोमोत्तममतितपस्तीव्रतेजः प्रशस्त-
च्छात्रव्रातादिकजननुतस्तुत्यनीरप्रवाहां
पूजापाठस्थितजनतटामाश्रमाराध्यतीराम्

१८

प्रालेयाद्रयुद्भवभवशिरःशोभितस्वच्छकच्छ-
श्वेतोदात्तोर्मिविहितरवापूर्णदिग्गह्वरालि-
ध्वस्तानेकापरिमितमहाग्रावखण्डप्रचण्ड-
नृत्यासक्तप्रथितसलिलब्रह्मपात्रप्रतिष्ठाम्

१९

नव्यानव्यैर्विविधबहुलैर्मन्दिरैश्चन्द्रमौले
श्चारुक्षोणीं प्रियपरिमलां गन्धपुष्पप्रभूतां
घण्टारावाकुलसमदिशां वेदपाठिप्रवीणां
गङ्गे गङ्गे शिव शिव जयेत्यादिनादप्रवृत्ताम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२०

अर्चां कृत्वा ह्यनुजदयिताभ्यां सहासौ ततश्च
मन्दाकिन्याः मुदितहृदयोऽभूद् भरद्वाजपूज्यं
यातो द्रष्टुं प्रचुरवटुभिर्ज्ञानवद्भिर्बुधैश्च
सेव्य नित्यं मुनिऋषिगणैराश्रमं तस्य दिव्यम्

२१

चित्तैकाग्रो विहितयजनः शिष्यवृन्दार्चितोऽभूत्
ज्ञानज्योतिर्निहतनिखिलाज्ञानपुञ्जो महर्षि
स्तेजोराशिर्विमलहृदयो वेदशास्त्रप्रबुद्धो
मन्त्रद्रष्टा रुचिरधिषणो ह्यात्मरूपस्थितोऽसौ

२२

श्रीरामस्यागमनमनघं मंगलं पुण्यधाम
श्रुत्वा जातः परममुदितः श्रीभरद्वाजविद्वान्
प्रत्युद्गन्तुं स ऋषितिलकं सस्मितं हर्षनेत्रः
कृत्वोत्थानं समुनिनिकरो राममन्वग्रहीच्च

२३

रामः सीता मुनिचरणयोः सादरं लक्ष्मणश्च
प्रीत्या भक्त्या व्यधिषत नतिं तस्य चांघ्र्यम्बुजेषु
मौलौ ते च न्यधिषत रजस्तस्य पादाम्बुजानां
श्रद्धास्निग्धा ऋषिवरगुणान् श्लाघमानास्त्रयोऽपि

२४

मन्ये ह्येषः सकलजगतः श्रेयसे त्वत्प्रवास
आज्ञामेतामहमनुचितां वेद्मि पित्रोर्न चातः
स्यात् संहारस्तव शरचयैः राक्षसानामवश्यं
धर्मघ्नानामघपथजुषां लोकरक्षाव्रतैक!


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

धर्मज्ञानां सुजनसुहृदां जीवनं त्वादृशानां
न्यायारूढार्जवनयवतां वेदरक्षापराणां
मर्यादासंस्कृतिमतिमतां सज्जनानां बुधानां
भोगार्थं नो भवति विषयाणां न संशीतिरत्र

२६

नैजं चित्तं गमय न शुचं राम निर्वासितोऽहं
पित्रा हेतोरनुचिततया चिन्तयित्वाधुनेति
निर्बन्धोऽसौ नियतिनियतो नात्र मातापराद्धा
श्रीकैकेयी मम मतिरितिबुध्नवंशावतंस

२७

रामस्त्वासीत् परमविमलस्वान्त औदार्यशुभ्रो
नो तच्चेतः पितरि मलिनं नैव चाम्बानिमित्ते
प्रागेवासौ सुकृतमधिकं तत्र मेने तदाज्ञां
तद् वक्तव्यं गुरुवरमुनेस्तञ्चकार प्रसन्नम्

२८

मत्वा वासं ससुचिततरं पर्वते चित्रकूटे
गोलाङ्गूलप्रचुररुचिरे वानरर्क्षादियुक्ते
नानावर्णद्विजसमुदयाराधितानोकहोच्चे
रामं तं सः प्रति निरदिशत् पूज्यपूज्यो महर्षिः

२९

तस्योद्यानं परमललितं चाश्रमं भव्यवर्णं
विज्ञैश्छात्रैर्हरिणनिवहैः सेवितं गोगणेन
वल्लीवृक्षैर्फलविलसितैः पक्षिवृन्दैर्मनोज्ञैः
रामो वीक्ष्याभवदलिगणैर्गुञ्जितं हर्षचित्तः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


३०

सार्धं रामो जनकतनयालक्ष्मणाभ्यां प्रतस्थे
हिंस्रै र्जीवैरुरगबहुभिः कुञ्जरै श्वापदैश्च
रम्यं स्रोतोविपिननिविडै र्निर्झरैः कन्दराभिः
प्रेक्षाञ्चक्रे पिकमृगवयोर्बर्हिभिश्चित्रकूटम्

३१

वीक्ष्यायोध्यां परममलिनां क्लान्तचित्तामितस्तां
याता वृद्धिं भरतसुधियस्तस्य चिन्ता नितान्तं
दृष्टाः सर्वा मनुजमहिला म्लानवक्त्राश्च तेन
दुःखाक्रान्तं नृपतिभवनं चेक्षितं शोकमग्नम्

३२

भ्राता रामः क्व मम जननि क्वास्ति पूज्यः पिता च
बन्धुः क्वास्ते गुणगणनिधिर्लक्ष्मणः क्वास्ति सीता
भ्रातुः पत्नी मृदुलहृदया स्नेहपूर्णा मदीया
श्रुत्वा तस्या झटिति जननी तं वचो व्याजहार

३३

स्यास्त्वं राजा प्रिय मम सुत प्रायते युक्तयुक्तये-
त्येतद्धेतोरभवदविहा विघ्नबाधानुविद्धं
दैवादिष्टं सह तव पिता स्वर्गलोकं गतोऽस्ति
रामोऽध्यास्ते विपिनमधुना जानकीलक्ष्मणाभ्याम्

३४

निःसंज्ञोऽभूद् भरतसुजनः साधुसंघाग्रगण्यो
मातुर्वाक्यं परमपरुषं वज्रतुल्यं निशम्य
हा हा जातं किमिव कलुषं क्रूरदुर्भाग्यविद्धो
नास्मिंल्लोकेऽहमिव सकले कोऽपि पापी जघन्यः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३५

कस्माज्जाते मयि च जननि त्वं न मामक्षणिष्ठाः
भानोर्वंशे त्वमसि महिषी निन्दनीया घृणार्हा
त्वद्धेतोर्हा नृपतिरजहाज्जीवनं बन्धु रामः
कान्तारे मे वसति नितरां शोचनीयासि मातः

३६

विश्वासं नो मनुज इह को नास्ति योगो ममात्र
लोके गच्छेदिति निगदतः शोकपूर्णं विलापं
श्रुत्वा राज्ञौ भरततनयस्यापि सर्वे सुमित्रा-
कौशल्ये च क्षितिपभवनेऽगुर्जनाः प्राज्यदुःखम्

३७

राज्ञौ द्वेऽपि प्रियनिजवधूभिस्तदानीं च साकं
भृत्याः सर्वे रुरुदुरधिकं ह्युर्मिला माण्डवी च
जग्मुर्मूर्च्छामथ च मृदुला कीर्तिरम्या श्रुतापि
शत्रुघ्नस्य श्रुतभुजबलस्याथ शोकाकुलस्य

३८

रामं सीतां सजलनयनाश्च स्मरन्त्यो भृशं ताः
भूपस्तुत्यश्वशुरनिधनं लक्ष्मणं काननस्थं
हा हा क्रूरप्रचुरविपदां पात एषोऽधुना नो
सोढुं शक्यं कठिननियतेर्नः सुखं जायते स्म

३९

स्युः कान्तारे कुसुमवपुषः कीदृशस्ते त्रयोऽपि
सीतारामौ मृदुलमनसौ लक्ष्मणो बन्धुभक्तः
स्मारं स्मारं भृशमिति तदा दुःखलीनाः स्नुषास्ता
श्चक्रन्दुर्हा सकलभवनं शोकमग्नं बभूव



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४०

धैर्यापास्तप्रवरगुरुणा श्रीवसिष्ठेन भूयः
रामप्रेष्ठः सुमतिभरतोऽनीयताश्वासनं स
उत्थायाथ क्षितिपतनुजो यैरुपायैश्च कैश्चिच्
छोकग्रस्तैः सकलसचिवैर्मन्त्रिभिर्मातृभिश्च

४१

पृष्ट्वा पूज्यं कुलगुरुमथ श्रीवसिष्ठं महर्षिं
शोकस्वान्तो दशरथसुतो धैर्यमादाय दीर्घं
मन्त्येष्टिं चाकुरुत भरतः शास्त्ररीत्या महत्या
क्षोणीपस्य प्रथितयशसः सः पितुः स्वस्य योग्यः

४२

तेनाहूता सपदि परिषन्मन्त्रिपौरादिकानां
यास्यामि श्वः शृणुत विपिनं राममानेतुमर्च्यं
बन्धुज्येष्ठं स इति भरतः प्राब्रवीत् तत्र सर्वान्
नाहं स्थातुं क्षणमपि विना रामबन्धुं क्षमोऽस्मि

४३

श्रुत्वा वाणीं भरतसुमतेः श्रीवसिष्टो बभाण
यावद्रामो विपिनवसतेर्यापयित्वावधिं स्वा
मागच्छेन्नो त्वमहि मतिमन् राज्यमेतद् गृहाण
भूत्वा भूपः सकलजनतां रक्ष तावच्च वत्स

४४

नत्वा शीर्षं गुरुचरणयोः सादरं प्रह्वरीत्या
धीमच्छ्रेष्ठप्रणतभरतः साञ्जलिस्तं शशंस
पूज्यं तं श्री गुरुवर मम क्षम्यतामाग एतद्
आनेष्यामि द्रुतमिह वनाद् राम एवास्ति राजा


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

४५

श्रुत्वा जाता भरतवचनं श्रीवसिष्ठो महर्षिः
राज्ञ्यश्चापि प्रमुदितहृदो मन्त्रिणः किञ्च पौराः
द्वौ तौ बन्धू द्रुतमकुरुतां पूर्णयुक्तप्रबन्धं
कृत्वा राज्ये विनयिभरतो नमशत्रुघ्नबन्धुः

४६

सार्धं पौरैः सचिवबहुलैर्मन्त्रिभिः सर्वराज्ञीः
आदाय श्रीगुरुवरमुनिं चेलतुर्द्राक् स्नुषाश्च
यत्रारण्येऽनुजजनकजाभ्यां समं रामबन्धु
र्वासं चक्रे स्वपितृवचसः पालनार्थं मुदा तत्

४७

मार्गे पश्यत् प्रकृतिललितामद्रिनद्यादिसेव्याँ
कृत्वा स्नानं विबुधतटिनीपुण्यनीरे सपर्यां
नत्वा चर्षिं जगति विदितं श्रीभरद्वाजपूज्यं
सौम्योऽमेलीद् विनयिनि वने रामभक्ते निषादे

४८

व्याधैर्वन्यैरगणितजनैराकुलं तुङ्गवृक्षै
र्घोरारण्यावृतमृषिगणै र्योगिभिर्ज्ञानिभिश्च
सेव्यं गङ्गाविमलसलिलक्षालितं क्षेत्रवृन्दं
हिंस्रै र्जीवै र्विहगबहुभिः सेवितं चित्रकूटम्

४९

वीक्षाञ्चक्रे मृगयुशबरग्रामटीं दर्शनीयां
साधूपास्यस्थविरवसतिं पर्णशालां च हृद्यां
युक्तां गोभिबहुमृगगणै र्निर्मितां लक्ष्मणेन
श्रीरामार्थं व्रततिमधुरां पुष्पवृक्षादिरम्याम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५०

दूराद् दृष्ट्वा विविधलतिकाभूषितां भव्यरूपां
स्निग्धच्छायातरुततिमतीं रामवासाभिवंद्यां
सर्वां सेनामनुजभरत: पर्णशालां स्वकीयां
सर्वानन्यानगमदतुलश्रीश्च कृत्वा स्थिरान् स:

५१

राम: श्रुत्वाऽऽगमनमनुजस्य प्रियं लक्ष्मणाच्च
पूज्यर्षे: श्रीरविकुलगुरोर्मातृवर्गार्चनीय-
मन्त्रिस्तोमाखिलपरिजनानां स्नुषाणां प्रियाणां
सेनायारप्यगमदमितं विस्मय हर्षगर्भम्

५२

रामं लब्ध्वा भरतसुभगो जग्मिवान् हर्षतीव्रं
दृष्ट्वा नैजं भरतमनुजं चामितं रामबन्धु:
सर्वे याता: सुखमतितरामागता: प्राप्य रामं
पूज्यं रामो रविकुलगुरुं श्रीवसिष्ठं ननाम

५३

अम्बा: सर्वा: प्रणतनिटिल: सोऽनमल्लक्ष्मणेन
सार्धं पूज्या: जनकसुतया किञ्च सर्वागतेषु
प्रीत्यामेलीद् विमलहृदयो मन्त्रिवर्गे प्रसन्न:
शत्रुघ्नेऽसौ प्रकृतिसरल: स्वस्नुषास्वाशिषा च

५४

सर्वश्वश्रूचरणकमलेष्वादरेण प्रणामं
सीता चक्रे पदसरसिजेषु स्वकीयां नमस्यां
प्रीतिश्रद्धासरसहृदया यातरश्चापि तस्या
श्चक्रुश्चाशी:प्रियशुचिगिरा साप्यमेलीच्च तासु



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

भक्तिश्रद्धाप्रणतहृदया लक्ष्मणस्य द्वितीया
शत्रुघ्नस्य स्वनतशिरसा ज्येष्ठरामांघ्रिपद्म-
स्पर्शञ्च क्रुर्भरतसुधियश्चापि हृद्यस्वरूपाः
सर्वा भाग्यं जनुरपि निजं मेनिरे सार्थकञ्च

५६

दृष्ट्वा सर्वां मलिनवदनाः पीड्यमाना भृशं ताः
सीता भूत्वा व्यथितहृदया सादरं नम्रवाचा
पप्रच्छ स्वां दयितजननीं मातरं लक्ष्मणस्य
अम्बाः प्रेक्षे न तु च भवतोष्वद्य सौभाग्यचिह्नम्

५७

पूज्यस्तातः क्षितिपतिरपि क्षेमवान् वर्ततेऽद्य
श्वश्र्वः श्रुत्वा रुरुदुरधिकं तां गिरां स्वस्नुषाया
स्तूष्णीं जाता भरतदयिता माण्डवी तां तदानीं
पूज्यो भर्ता भगिनि भवतीं सूचयेत् स्वञ्च बन्धुम्

५८

वध्वः सर्वा हुतमुखविभा व्यक्तशोका विलेपू
रामो ज्ञात्वा भरतवचनात् स्वर्गवासं पितुश्च
सीता जाता व्यथितहृदया लक्ष्मणो दुःखितोऽभूद्
दुःखं जग्मुः सकलमनुजा मन्त्रिणः श्रीमहर्षिः

५९

रामः सार्धं जनकसुतया बन्धुभिश्चाजगाम
गङ्गां पित्रे सलिलमददात् ते पितः स्यादवाप्तं
याम्यां भूत्वोदकमभिमुखः प्राब्रवीदञ्जलिस्थं
कृत्वा दत्तं भवतु च रुदन् सः सनिर्वापमेतत्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६०

कृत्वा संध्यामुषसि च ततो भ्रातरो रामबन्धुम्
आगच्छंस्ते सकलसुहृदश्चापि तूष्णीं निषेदुः
मध्ये तेषामनुजभरतः सादरं राममूचे
बन्धो पित्रा मम वरयुगेनार्चिता मान्यमाता

६१

दत्त्वा राज्यं त्वहमथ तया तोषितः साम्प्रतं तत्
प्रीत्या तेऽद्य सुखितमनसा दीयते गृह्यतां तद्
राज्यं वोढुं गुरुतरमिदं त्वां विना नास्ति कोऽपि
बन्धोऽस्मासु प्रभवति मम प्रार्थनेयं विनीता

६२

सर्वे पौराः सकलसचिवा मन्त्रिणः श्रीवसिष्ठो
राज्ञो सर्वाः परिजनजना राजसिंहासनस्थं
त्वामौत्सुक्यं दधति हृदये वीक्षितुं पूज्यबन्धो
तस्माच्चैतां प्रणतिविनयप्रार्थनां स्वीकरोतु

६३

श्रुत्वा वाक्यं सकलसचिवा नागरा मन्त्रिवर्गः
श्रीपूज्यर्षिर्भरतसुधियश्चान्वमन्यन्त तच्च
प्रेक्ष्य क्लान्तं मलिनवदनं कीर्तिमन्तं स्वबन्धुं
तं श्रीरामः प्रियतरगिराऽश्वासयत् सान्त्वयंश्च

६४

उक्ती रामं भरतसुमतेस्तोषयामास भूयः
प्रीत्यागादीद् रविकुलगुरुं श्रीवसिष्ठं प्रणम्य
बन्धोऽसि त्वं भरतवसुधासंस्कृतौ साधु वेत्ता
लोकं रक्षेन्नृप इति पिता ते ददौ राज्यमेतत्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६५

कष्टग्रस्ता भरत ! जनता शासने शासकस्य
वन्धो ! यस्य प्रिय हि नरकं यात्यसावश्यमेव
यः सूनुर्नो गुरुजनवचोरक्षणौत्सुक्यचित
स्तस्मान्निन्द्यो जगति निखिले नास्ति कश्चिज्जनश्च

६६

राज्ये शिक्षा परमसुलभा स्याद् युवानश्च बालाः
सम्प्राप्तुं तां सकलशिशवः सन्तु योग्याः समर्थाः
गार्हस्थ्यस्थाः शुभपथगता धर्मकर्त्तव्यनिष्ठाः
सम्पच्छाली कमपि न जनं निर्धनं शोषयेच्च

६७

नो व्यापारी न हि च वणिजो दुष्टवित्ताः भवन्तु
त्वद्राज्यं स्याज्जगति जनताजीवनार्थं प्रियं च
पश्येद् भद्रं सकलजनता जीवने सर्वथैव
राज्यं स्यात्ते विविधवहुलश्रीपदार्थप्रपूर्णम्

६८

चौरा राज्ये झटिति सकला दण्डिताः स्युर्निबद्धाः
नीतिज्ञः सन् भरत ! कुपथस्थान् जनान् दण्डय त्वम्
उत्कोचे यो रमयति मनो राज्यकार्यं क्षिणोति
क्षिप्रं तं त्वं धर च मनुजं राष्ट्रहानिप्रसक्तम्

६९

अन्न खाद्यं विविधमशनं भेषजं पेयवस्तु
सर्पिक्षीरप्रभृतिवहुलग्राह्यवस्तुप्रभूतं
हेयैर्युक्तं भरत ! कुरुते यो नरो निन्द्यकार्यं
स्तं राज्ये त्वं जनहितरतो विद्धि राष्ट्रस्य शत्रुम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


७०

शिक्षा कार्या प्रचुरधनदाऽऽध्यात्मिकी चित्तशुद्ध्यां
लग्ना मेधोदयगतिरता स्युर्जनाः प्राप्तकार्याः
यन्त्रागारा विविधबहुलोद्योगशालाश्च राज्ये
यत्नाः स्युस्ते प्रिय शतमुखा विद्युदुत्पादनादौ

७१

सद्यानानां समुचितदशा मार्गरम्यप्रशस्ता
श्रेष्ठाः संस्था विविधबहुला ज्ञानविज्ञानदात्र्यो
भूयस्यः स्युर्बहुजनहिताः सेतवो बन्धनानि
वृद्धौ राष्ट्रे प्रियवर कृषेः साधनान्युत्तमानि

७२

शक्तिश्रेष्ठावनिजलनभोऽनीकिनी चायुधानि
रक्षासज्जा समुचिततरा रक्षिणः सच्चरित्राः
स्यू राष्ट्रस्याधिकरणमपि न्यायनिष्ठं सदैव
सद्राज्ये ते समयरुचयो वत्स ! कार्यालयाश्च

७३

दृष्टिः पूता भवतु च सदाचारिणो प्राणिवर्गे
उन्नत्यर्थं समुचिततमं मानवाः प्राप्नुवन्तु
सर्वे कालं भरत ! न जनः कोऽपि दैन्यं लभेत
सर्वे पुत्रा इह भगवतो विस्मरेन्नेति चैतत्

७४

योग्योऽसि त्वं भरत ! नयविच्छक्तिशाली प्रथीन्द्रो
गच्छायोध्यामव हितरतः स्वप्रजास्त्वं पितेव
कृत्वा वासं श्रुतिशशिसमाः कानने स्नेहपात्र
मायास्यामि प्रिय मम पितुः पालयन् क्षिप्रमाज्ञाम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


७५

धत्से शक्तिं भुवनमखिलं रक्षितुं वीरधन्विन्
का वार्तेयं निजजनपदानां सुरक्षाप्रसक्ता
सर्वाम्बानां त्वमसि सुतरां शान्तिदाताश्रयश्च
लोकत्राता परुषविपदि त्वां विहायास्ति कोऽस्याम्

७६

श्रुत्वा वाचा मनुजभरतो बन्धुरामस्य तां तां
सन्नश्रुवक्षः प्रणतिनिटिलो दुःखचेताः शशंस
पूज्यभ्रातः शरणमसि मे पादुके देहि मह्यं
भूत्वासीने त्वयि च जनतां पास्यतस्ते वनस्थे

७७

नत्वा रामो गुरुवरमुनिं मातृसर्वा ववन्दे
नम्रः सः सन् मधुरवचसा केकयाधीशपुत्री
मम्बामूचे जननि सदये मा स्म गास्त्वं विषादं
भाग्यं हेतुर्भवति सततं सम्पदामापदाञ्च

७८

उक्त्वाथ श्रीजनकनृपतिं सादरं सः प्रणम्य
सर्वामात्यप्रवरनिवहे मन्त्रिपौरादिकेषु
प्रीत्यामेलीद् रघुकुलमणिर्धर्ममार्गाधिरूढः
शत्रुघ्नं स्वं भरतमनुजं मूर्ध्नि चाघ्रात् तदानीम्

७९

सीता श्वश्रूचरणकमलेष्वादरेण प्रणम्य
स्वैराशीभिर्विमलमनसा यातृवर्गं कृतार्थं
कृत्वा सद्यः प्रणतहृदयो लक्ष्मणश्चापि तत्र
पूर्णौचित्यैर्भृशमभिमिलन् मातरं ह्याचचक्षे


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



८०

यावद् वासं वयमधिवनं ह्याचरामो ममाम्ब !
तावद् धैर्यं हृदि निदधती सङ्कटं त्वं सहस्व
मा त्वं चित्तं गमय जननि क्लेशचिन्तातिदीर्घा
माश्वास्येत्थं मृदुलहृदयश्चोर्मिलायां मिमेल

८१

कान्ते त्वां किं शुचिमतिमतीं साम्प्रतं व्याहरेयं
नूनं लोके त्वमसि ललनामण्डले कीर्तनीया
धैर्यस्तुत्यान्वितसुमतिता या त्वया दर्शितास्ति
भूयो भूयो भृशमभिगृणंस्त्वां स्तवीमि प्रियेऽद्य

८२

आश्वास्येत्थ नृपतितनयामुर्मिलां रामभक्तः
शत्रुघ्नेऽसौ सुभगभरते सादरं चामिमेल
कृत्वाचारं नियमविधिना लक्ष्मणश्चापि रामः
सर्वान् स्वांस्तान् प्रियपरिजनांश्चक्रतुः प्रस्थितांश्च

८३

प्रियभारतभूमिरियं महती
यततां सततं मनसा नितरां
चरिते ह्यभिवादनयोग्यगुणान्
अवतारयितुञ्च पुनर्मधुरान्

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये रामवनगमनं नाम अष्टमः सर्गः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ नवमः सर्गः

१

समा उषित्वा हि चतुर्दशाज्ञां
वने पितुर्यः परिरक्षति स्म
सुखं च दुःखं सममेव योऽवेत्
प्रणम्यतेऽसौ विनयेन रामः

२

उपेत्य धीरो भरतः पुरीं स्वा
मुवाच वन्धुं वचसा प्रियेण
शत्रुघ्न ! गोपाय प्रजाः स्वदेशे
कुरुष्व सेवां नितराञ्च तासाम्

३

भवेद्धि राज्यं धनधान्यपुष्ट
मपेक्ष्यते वस्तु च यत् तदर्थं
हितप्रदं तद् द्रुतमेव साध्यं
चिनुस्व तत् स्यात् सुखितं समृद्धम्

४

अवंश्च नित्यं दिवसे निशायां
वसिष्ठपूज्यस्य गुरोरनुज्ञां
स्वकीयदेशोन्नतिहेतुना त्वं
यतस्व बन्धो सततं श्रमेण



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५

अमात्यवृन्दे निदधत् स्वदृष्टि
स्वदेशरक्षार्थमथ प्रकृष्टा
मनीकिनीं योजय यारिवर्गाद्
बहिश्च सान्तः परिपात्यजस्रम्

६

निवर्तते नो नगरीमयोध्यां
क्षमापती राम इमाञ्च यावद्
भवेन्निवासो मम तावदेव
पुराद् वहिस्तापसपूतवृत्या

७

विलोकयिष्यामि तथैव भूत्वा
यथोचितं देशदशाकलापं
परं त्वमात्मानमवेहि मुख्यं
न विस्मर त्वं कथितं ममेदम्

८

निगद्य बन्धुं भरतः प्रपेदे
पुराद् वहिः पत्तननन्दिपूर्वं
सुखानि सर्वाणि विहाय साध्वीं
सुवृत्तिमाश्रित्य तपस्वितायाः

९

भवन्निलीनस्तपसि प्रकृष्टे
सदैव रामं मनसा भजंश्च
पयःफलादावथ कन्दमूले
स्वजीवनं सात्त्विकमेव निन्ये

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

तपस्वितां तस्य च तां सपर्यां
व्रतं कठोरं नियमान् कठोरान्
विलोक्य सर्वे मुनयोऽपि जग्मु
र्नितान्तमाश्चर्यमथ त्रपाञ्च

११

व्रतैः कठोरैः कृशतामगच्छत्
परन्तु तेजोऽतितरामयासीद्
दिने दिने तस्य तपस्विवृत्ते
र्जटाभृतो रामरतस्य वृद्धिम्

१२

इतश्च रामः सहः लक्ष्मणेन
क्षमापतेः श्रीजनकस्य पुत्र्या
विहाय तं पर्वतचित्रकूटं
ययौ पुरो दण्डककाननाशाम्

१३

अगात् तपस्यारततापसानां
पवित्रशान्ताश्रममण्डलं सः
प्रकाशितं ज्ञानमनोज्ञदीप्त्या
विभासितं विश्वपरैश्च भक्त्या

१४

तपस्वितेजोभिरभूत् प्रदीप्तं
कुशैश्च चीरैर्बहुभिः सनाथं
तन्मण्डलं भास्करबिम्बतुल्यं
वने चकास्ति स्म मखाग्निभिश्च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१५

मृगैरनकैर्विहगैश्च गोभिः
पिकैर्मयूरैः शुकसारिकाभि
र्निषेवितं सात्त्विकमानसैश्च
दिवा निशायामपि मण्डलं तत्

१६

प्रदेश आसीद् हृदयाभिराम
स्तस्मात् स जातो हरिभक्तिभाजां
विहारभूमिश्च सुराङ्गनानां
फलप्रदैः शाखिभिरादृतः सः

१७

विशालशुभ्रोत्तमयज्ञशाला-
विभूषिताः स्रुक्कुशभाण्डकुम्भैः
समिद्भिरप्पात्रविभोज्ज्वलैश्च
पुष्पैरनेकैर्विविधैः सनाथाः

१८

अनेकयज्ञैर्बलिवैश्वदेवैः
सुशोभिता वेदपुराणविद्भिः
पयोजशोभानुपमैः सरोभि
र्विरेजिरे तत्र शुभाश्रमास्ते

१९

सुशोभितास्ते गुरुमण्डलेन
परैश्च विद्याध्ययने ह्यजस्
रतैः स्वशिष्यावलिपाठने च
महामनीषारुचिरेण भव्याः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२०

विलोक्य रामं सह लक्ष्मणेन
विदेहपुत्र्या निखिला अभूवन्
प्रसन्नचित्ता ऋषयः सशिष्याः
व्यधुश्च तस्यातितरां सपर्याम्

२१

व्यधायि रामोऽतिथिरातिथेयैः
समादृतो यज्ञतपोऽभिरक्षी
समस्तलोकस्य हितैकलग्नो
निवेशितस्तैश्च चरित्रशुभ्रैः

२२

प्रयुज्य मङ्गल्यमथाब्रुवंस्ते
नृपोऽस्ति धर्मस्य पिता महीयान्
जनान् सुमार्गं नयतेऽनिशं सः
स दण्डधारी जगतीहिताय

२३

वयं वसामो भवतो हि राज्ये
नृपेन्द्र ! रक्षा भवता विधेया
वनस्थितानामपि नो मुनीनां
पितेव सोऽवेज् जनतां समस्ताम्

२४

बभूव रामोऽतितरां कृतार्थः
कृतार्चया सादरमुक्तवान् सः
इदन्तु कार्यं प्रथमं सदा नो
ह्यवेम विद्यां च शुभं चरित्रम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२५

भवन्तु सर्वे मुनयो भवन्तो
विज्ञानविद्यातपसां समुद्राः
कृपामया येन वयं स्वधर्मं
भवेम पातुं नितरां समर्थाः

२६

निवेद्य रामः कमलाननोऽसा
ववाप्य चाज्ञां मुदितस्ततोऽग्रे
चचाल पश्यन् प्रकृतेः प्रियाणि
वदान्यदृश्याणि भृशं नवानि

२७

वने स गच्छन् परुषातिभीम
ददर्श नक्तञ्चरघोररूपं
विराधदुष्टं दुरितेषु लीनं
जघान बाणेन च राक्षसं तम्

२८

ततो ययौ पावनमाश्रमं सः
तपोधनस्य द्रुतमेव रामो
महर्षिविद्वच्छरभङ्गनाम्नो
महाद्भुतं भक्तिविभूतिभव्यम्

२९

मुनिः स आर्चीन्मुनिरक्षिणं तं
नितान्तभक्त्या बहुहर्षचेताः
कृतार्थतां प्राप्य च जीवनस्य
प्रविश्य वह्नौ हरिलोकमैत् सः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


३०

पथि प्रशंसन् नितरां महर्षे
विशुद्धभक्तिं दुरितप्रहर्त्री
मभीष्टमुक्तिप्रदशक्तियुक्ता
मुवाच रामोऽप्यधिकृत्य भक्तिम्

३१

प्रजायते भक्तिवशाददोषं
मनो जनानां कुरुते च पात्रं
हरेः कृपाया द्रुतमेव तच्च
हिनस्ति पापान्यखिलानि भक्तिः

३२

सहिष्णुतां सा हृदये च सूते
करोति दृष्टिं समदर्शिनीं सा
समस्तभूतप्रियमित्रमेव
जनं दयालुं छलदम्भशून्यम्

३३

न कोऽपि शत्रुर्न च तस्य मित्रं
सुखञ्च दुःखं सममेव तस्य
स्तुतिञ्च निन्दां मनुते समां सः
दधाति भक्तिं मनुजो हरेर्यः

३४

अतो मनुष्यः प्रयतेत लब्धुं
हरेर्हि भक्तिं कठिनश्रमेण
समर्प्य सर्वं हरये सहर्षं
प्रयातु शीघ्रं शरणं हरिं सः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



३५

हरेः समस्तं मम नास्ति किञ्चित्
अहं समर्थो न, हरि: समर्थ:
कृपावशात् तस्य समग्रकार्यं
स जायते वेत्तु सदा जगत्याम्

३६

वदन्निति प्रीतमना अरण्ये
तपोनिधिं ज्ञाननिधिं सुतीक्ष्णं
जगाम भक्त्या परिवीक्षितुं स:
स्वबन्धुसीतादयितासहाय:

३७

विलोक्य मार्गेऽस्थिगिरिं हतानां
प्रदर्शितं साधुजनैर्मुनीनां
मनोऽदुनोत् तस्य हि राघवस्य
तपोधनानामृजुवृत्तिभाजाम्

३८

जगन्महावीरगणाग्रगण्य
इमां प्रतिज्ञामतिरोषपूर्ण
श्चकार नक्तञ्चरशून्यपृथ्वी
महं करिष्ये रघुवंशजात:

३९

महर्षिवृन्दप्रियराघवेन्द्रो
विलोकयंस्तद्विपिनं प्रगल्भं
समागमत् तत्र बिराजते स्म
मुनेः सरो यत्र हि माण्डकर्णे:

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४०

निशम्य माहात्म्यमसौ महर्षे
स्तपो महीयश्च धियोज्ज्वलस्य
विनिर्मितं येन हि तत् तटाकं
नितान्तवैचित्र्यमयप्रभावम्

४१

मनःप्रियं गीतिपदं हि भूषा-
स्वनैश्च वादित्ररवैः सुमञ्जुलं
यदाश्रृणोद् राम इयाय तत्र
पुनः पुनर्विस्मयमेव दीर्घम्

४२

किमस्ति तत्कारणमत्र पृष्टः
कथां मुनिर्धर्मभृदुक्तवांश्च
करोति वासं मुनिषु प्रभावो
विचित्र एवेति बभाण रामः

४३

ययौ सुतीक्ष्णस्य विलोकनाय
ननाम गत्वा मुनिवृन्दमान्यं
तदाश्रमं भक्तिविभावदात
मवाप्य धन्यं स्वजनुर्गरीयः

४४

कृतार्थतां सोऽपि निनाय रामं
समर्च्य तं साञ्जलिरादरेण
भवन् प्रसन्नोऽत्यतिथिं वरेण्यं
तपोनिधिर्ज्ञानगुणाब्धिवंद्यः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



४५

ततः सुतीक्ष्णो मुदितो ह्यनैषीन्
मुने रगस्त्यस्य तपोधनस्य
वुधस्तुतस्याश्रमदर्शनीय-
विशालविज्ञानगृहोद्भवस्य

४६

बभूव रामोऽतितरां कृतज्ञो
यदा च तस्माद् बहुलायुधानि
बहूनि शस्त्राणि नवास्त्रराशि
मवाप कोदण्डसुशोभितोऽसौ

४७

अवाप्तसत्कार उदारराम
ऋषेरनुज्ञामधिगम्य साधु
स्ततः प्रतस्थे प्रणमन् सुधीन्द्रं
वनं ययौ सुन्दरमीक्षमाणः

४८

मधूकविल्वान् बहुवञ्जुलांश्च
द्रुमांश्च नीवारकदम्बनाम्नो
लताश्च सालान् पनसाननेकान्
ददर्श कान्तारगतो मनीषी

४९

शमीधवादीन् लकुचाश्वकर्णान्
तमालतालांस्तनिशान् रमालान्
पलाशपर्णासतरूननेकान्
विलोक्य रामो लभते स्म हर्षम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५०

शशंस सौमित्रिमवेक्ष्य रामो
मनोऽभिरामामनवद्यनीरां
विचित्रपद्माधिकतामनोज्ञां
धुनीं वनोत्सङ्गगतां पवित्राम्

५१

नितान्तसच्छायमहीरुहस्य
सुकोमलात्यन्तलतार्चितस्य
फलैश्च पुष्पैर्विविधैर्युतस्य
वनस्य शोभा हृदयं धिनोति

५२

इहाश्रमं लक्ष्मण देशरम्ये
कुरुष्व रम्भावटपुष्पवृक्षै
स्तृणावृतेनोटजबन्धुरेण
सुशोभितं कुञ्जशुभप्रियैश्च

५३

विशालमेकं कुरु चत्वरञ्च
वयं भवेमर्षिजनोपदेश
मधिष्ठिता यत्र सुखेन सर्वे
क्षमा भृशं श्रोतुमभीप्सितार्थम्

५४

मनोरमा पञ्चवटीयमीड्या
सरिच्च गोदा कलुषार्तिहन्त्री
वनं तपस्याभिमतानुकूलं
द्रुमावृतोऽयं सुखदप्रदेशः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

निशम्य रामस्य वचोऽनुजोऽसौ
मृदा हि भित्ती विरचय्य पुष्टाः
शरैश्च काशैर्बहुभिः कुशैश्च
छदिः कृता वंशचयं प्रयुज्य

५६

समं तलं स्निग्धतरं विधाय
निवासयोग्यामतिदर्शनीयां
मनोनुकूलप्रियपर्णशालां
विना विलम्बं कृतवान् गुणाढ्यः

५७

विलोक्य तां सुन्दरपर्णशाला
मियाय रामो नितरां प्रसादं
स लक्ष्मणं स्वं परिषस्वजेऽलं
भृशं प्रशंसन् सह सीतया च

५८

उवास शृण्वन् बहुवर्षकालं
महर्षिवृन्दस्य महोपदेशं
नितान्तभक्त्या शशिशेखरञ्च
भजन्नवंश्चापि तपस्विनः सः

५९

सतां सभायां स्थित एकदापि
स्वोचदेवं मनुते स्वलाभं
परस्य लाभं भुवने स एव
प्रधीषु मान्यः सुजनाग्रणी ना

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६०

विपत्सु भूत्वा पतितोऽपि यो ना
प्ररक्षितुं न्यायमसून् जुहोति
स ईशभक्तो जगतीह गीत
उवाच विद्वांश्च तपस्विमान्यः

६१

तपो न सत्यात् परमस्ति किञ्चित्
तदेव सत्यं परमेश्वरोऽस्ति
प्रयाति यस्तच्छरणं मनुष्यो
जगत्पयोधिं तरति प्रधीः सः

६२

ब्रुवन्मुनिस्तत्र सभान्तराले
ह्ययूपुषत् सत्यमथेतरश्च
ततो विपश्चिन्मुनिराबभाषे
श्रयेन्न लोभं दुरितस्य बीजम्

६३

ततश्च कश्चिन्मुनिमान्य ऊचे
जगद्धितार्थी प्रतिभावदातो
विपत्पयोधिं जन उत्तितीर्षु
र्भजेद् धृतिं नावमवश्यमेव

६४

विदन्तु हेतुं सकलोन्नतीना
मनुत्तमं चेन्द्रियनिग्रहं वै
भवन्तु सद्यः सततं तदर्थं
वसुन्धरायामतिसावधानाः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६५

धनञ्च विद्यामधिगन्तुमिष्टां
सुखानि भोक्तुञ्च रिपूंश्च जेतुं
यशांसि लब्धुं च महीपतित्वं
स एव गीतो भवितुं समर्थः

६६

सदैव भूत्वा विजितेन्द्रियो यः
पवित्रचित्तो नयति स्वजीवनं
हरिप्रियोऽसौ सुजनो मनीषी
शशंस कश्चिद् ऋषिसत्तमश्च

६७

विधाय कर्माणि हरिस्थचित्तो
विनैव कामं गमयेन्मनीषी
स्वजीवनं ज्ञानमुपार्जयंश्च
बभाण कश्चिन्मुनिमान्य एवम्

६८

क्षमाममन्युं च दमं श्रयंश्च
सदैव शौचं निदधन्न चेतो
धने हि कस्यापि जनस्य लोके
वहेदसून् योगरतः सुधीन्द्रः

६९

ततश्च सेवामधिकृत्य कश्चि
ज्जगाद धीमान् मुनिलोकमान्यो
ह्यतूतुषत् सोऽखिलसाधुवर्ग
मभूत्समाप्तौ कथनं तदीयम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



७०

कृतज्ञताञ्च प्रकटीचकार
मुनीन्द्रसर्वेषु तपस्विरामः
प्रणम्य तांस्तां कृतवान् विसृष्टां
सभामसौ धन्यगिरा विनम्रः

७१

कदापि सीतां प्रियलक्ष्मणञ्च
जगाद चोद्दिश्य मुदाभिराम
ऋतुं हि हेमन्तमथैकदेदं
विलोक्यतां तच्छविचित्तहृद्या

७२

मृदू रविः सम्प्रति पुष्टशैत्या
श्चलन्ति वाता दिवसाश्च ह्रस्वाः
हिमेन नीतानि वनानि कार्श्यं
निशा सुदीर्घा प्रिय ग्रातपश्च

७३

प्रतोयते चन्द्रसमो दिनेश
इवोष्णता तत्र न विद्यते नु
विहारयोग्यानि दिनानि सन्ति
प्रियं न नीरं प्रतिभाति शैत्यात्

७४

मलप्रभां घोरतुषारपातात्
दधाति चैषा रजनी हिमर्तौ
समस्त भूमण्डलमस्ति कष्टे
दुनोत्यवश्यायनिपात एषः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



७५

वनानि गोधूमयवश्रितानि
विभान्ति वाष्पावृतविग्रहाणि
सुवर्णतुल्यच्छविशोभिताश्च
न शालयः सन्ति कृतोच्चशीर्षाः

७६

प्रभातकाले रविदर्शनेन
मनोऽश्नुते तोषमलञ्च सौख्यं
प्रियः स्वनः क्रौञ्चखगस्य याति
श्रुतिं मही क्लिन्नतृणा चकास्ति

७७

रुतेन नद्यः खलु सारसानां
भवन्ति वेद्या हिमखिन्नतोयाः
न वस्तुतः सम्प्रति शैत्यहेतो
र्जना दरिद्राः सुखमाप्नुवन्ति

७८

न नालशेषाणि सरः स्थितानि
हिमातिपाताद्धतजीवनानि
मनांसि पुंसां नयनानि किञ्च
प्रमोदयन्ते गतकेसराणि

७९

वसुन्धरा सस्यसुशोभितास्ति
प्रभूतदुग्धा अधुना च गावो
भवन्ति, वह्निः सुखदश्च सह्यः
सुखेन शैत्य धनिकस्य याति

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



८०

अथैकदा शूर्पणखाऽऽजगाम
यदृच्छया राघवपर्णशालां
स्वसा हि लङ्काधिपतेः सकाशे
प्रयाय रामस्य च सा बभाषे

८१

विलोक्य कन्दर्पनिभं भवन्तं
मदीयचित्तं मदनस्य जातं
वशे विशालाक्ष ! करोतु कान्तां
भवान् सरोजानन ! शक्तिमन् ! माम्

८२

वने विविक्ते कुरुते निवासं
किमर्थमेतच्च भवान् ब्रवीतु
सुतो भवान् कस्य च कोऽस्ति देश
इदञ्च वेत्तुं मम मानसेच्छा

८३

अथ द्वितीयो भवता च सार्धं
मनोजरूपस्तरुणोऽस्ति कोऽय
मियञ्च का रूपवती मृगाक्षी
ब्रवीतु धन्विन् ! जलजाक्ष ! वीर !

८४

अवाप्य सङ्केतमथ स्वबन्धोः
कथा स्वकीया पुरतश्च तस्याः
न्यधायि संक्षिप्ततयानुजेन
स्वबोधनस्था बुधलक्ष्मणेन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


८५

ततश्च तस्यामपि लब्धबोधः
शशंस रामो विपिने भ्रमेत् सा
तथाविधा नो विजने भवन्ती
कुलोद्भवा भीषणहिंस्रभीमे

८६

न भाषितं तत्कुलजाङ्गनानां
त्वया यदुक्तं श्रुतिभिश्च सद्भिः
समादृतं सम्परिपोषितञ्च
कदापि नेष्टा च दशा त्वियन्ते

८७

बभूव रामः सुजनाध्वगामी
सदैव शास्त्रीयमतानुयायी
पवित्रचारित्र्यविशुद्धचित्तो
जितेन्द्रियः साधुसमाजसेव्यः

८८

स्वतन्त्रधीः शूर्पणखानुमेने
न तान् विचारान् परतन्त्रतायां
स्त्रियं महत्यां विनिपातयन्ति
हरन्ति ये स्वत्वमथात्र तस्याः

८९

लघीयसी नास्ति कदापि नारी
सदास्ति सापीव नरः स्वतन्त्रा
वचर चैतत् कुटिला वभूव
नितान्तकोपाकुलमानसा च


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


९०

प्रभावपूर्णां बलशालिनीं मा
मवेहि लङ्काधिपतेः स्वसारं
वसामि नाहं परतन्त्रतायां
पुष्णामि नैजञ्च विचारराशिम्

९१

न चेच्छ्रुतं मद्वचनं त्वयाद्य
विनाशयिष्यामि तवानुजेन
समं शठ त्वां शृणु मत्प्रतिज्ञां
वसन्ति मद्बन्धुजना वनेऽस्मिन्

९२

निशम्य तस्या वचनं कठोर
मुवाच रामः प्रतिभासि मे त्वं
विना च नासा श्रवणे स्वतन्त्रे
प्रयाहि न त्वां तरसा दिदृक्षुः

९३

पलाय्य दुष्टा च ततः कठोरा
जगाम यत्रावसतां नृशंसौ
निशाचरौ सज्जनराजिशत्रू
खरः प्रचण्डाधमदूषणश्च

९४

विज्ञाय तस्याः सकलां स्थितिं तौ
विधाय वोध वसतेश्च बन्ध्वो
नृवीररामस्य च लक्ष्मणस्य
समञ्च ताभ्यामवगम्य सीताम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


९५

चरूथिनीं स्वां प्रति तौ मदान्धा
वयच्छतां क्रूरतरामनुज्ञां
प्रचण्डतीव्राक्रमणं विधातुं
निशाचरौ दारुणकर्मदक्षौ

९६

उभौ च भीमावधमौ निहन्तुं
निशाचराणां धुरि कीर्तनीयौ
महानृशंमावुभ चक्रमाते
ह्यजेयरामं प्रियलक्ष्मणञ्च

९७

विलोक्य सेनां रजनीचराणां
निगूह्य सीतामविजेयशौर्यौ
भयप्रदां भीषणशक्तिभाजां
निजघ्नतू राघवलक्ष्मणौ तौ

९८

प्रयुज्य शस्त्राणि विनाशकानि
महाप्रकृष्टास्त्रधरौ महन्तौ
समग्रसेनां खरदूषणौ च
पुरं यमस्याथ च निन्यतुस्तौ

९९

निशम्य शोकास्पदघोरदुःख
मुदन्तमत्यन्तरुषं प्रपेदे
निशाचराणामधिपः प्रचण्डः
सुवर्णलङ्कापति रावणोऽपि



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१००

स वीरमारीचमथादिदेश
प्रयातु रामस्य कुटीं वनस्थां
निधाय हैमं हरिणस्वरूपं
विधाय मायां निकषा च तीव्राम्

१०१

विनाशकालः क्षणदाचराणा
मभूत् समीपे च पतिर्विलम्बं
विनैव मारीचमहाप्रवीणं
छलेष्वरण्यं प्रजिघाय दुष्टः

१०२

हरेत् स रामं ह्युटजात् तदीयान्
नितान्तदूरे कुरुताच्च सांति
प्रगाढमायामवलम्ब्य शीघ्र
मिति प्रभाषेत च 'राम' शब्दम्

१०३

निशम्य शब्दं तव लक्ष्मणोऽपि
विहाय सीतामुटजात् तदानी
मयिष्यते रामसमीप एव
क्रियेत सीताहरणं मयेत्थम्

१०४

तथास्तु मारीच इति प्रभाष्य
गतो वनं हेमकुरङ्गरूपं
निधाय रामोटजपार्श्वं एव
मनश्च जह्रे जनकात्मजायाः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०५

कुयोजना सा फलमिष्टमेव
निनाय लङ्काधिपतिं परन्तु
हतो हि मारीच इयाय नाकं
जहार सीतामपि रावणोऽसौ

१०६

अवाप्नुवँल्लक्ष्मणशोकमग्नं
यदा न रामो ह्युटजे ददर्श
ययौ भृशं दुःखमसह्यतीक्ष्णं
प्रियां स्वपत्नीं जनकस्य पुत्रीम्

१०७

असह्यचिन्तां निदधात् स्वचित्ते
त्यजन् कुटीं पञ्चवटीस्थितां तां
पदे पदे वृक्षलताश्च पृच्छन्
वनान्तराले व्यथितो व्यलोकि

१०८

तदीयदुःखेन वनस्य जीवाः
अगुः शुचं वृक्षलतापगाश्च
तदा स रामस्य विलाप उच्चैः
अरूरुदत् सर्वचराचरञ्च

१०९

अवतु सतां निकरं सततं
भरतधरा रघुवंशरवेः
हृदि विमला सुदृढा वचने
भवतु च सा शुभकर्मरता

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये रामवनवासो नाम
नवमः सर्गः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ दशमः सर्गः

१

बाहोर्बलाद् यस्य तपश्च विद्याः
धर्मश्च शुभ्राः शुभमार्गनीतयो
न्यायश्चरित्रं जगतीह रक्षां
सम्प्राप्नुवंस्तं प्रणमामि रामम्

२

रामो यदा लक्ष्मणबन्धुयुक्तः
सीतामरण्ये विचचार खिन्नो-
ऽन्विष्यंस्तदा प्रेक्षितवाञ्जटायुं
मृत्यून्मुखं रावणशस्त्रविद्धम्

३

युद्धं तदीयं सह रावणेन
जातं च सीतां न तु सः समर्थः
कृत्वापि यत्नं नितरां गृहीतुं
'तेनैव नीतोऽहमिमामवस्थाम्'

४

श्रुत्वा वचोऽदूयत तस्य रामो
मृत्युं प्रयातस्य स दुःखचेताः
अन्त्येष्टिसंस्कारमदीनसत्त्व
श्चक्रे तदीयोपकृतिं स्मरंश्च



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५

सीतामितो रावण निन्द्यमार्गो
हृत्वा न्यधात् तां क्षणदाचरेन्द्र-
श्चाशोकरम्योपवने नृशंसो
रामद्वितीयाहरणाघकारी

६

अन्वेषणं राम इतस्ततश्च
कुर्वन्नरण्ये जनकात्मजायाः
अत्यन्तघोरे विपिने ददर्श
दुष्टं कबन्धं बलभीमबाहुम्

७

नीत्या च युक्त्या स्वबलं प्रयुज्य
सौमित्रिरामौ तरसा कबन्ध
मुच्छिद्य बाहू न्यहताञ्च तस्य
लोकातिसन्तापकरप्रचण्डम्

८

बन्धू ततो द्वौ विपिने भ्रमन्तौ
पम्पाभिधानं हृदयाभिराम
माजग्मतुः श्रेष्ठसरोऽच्छनीरं
पद्मै र्विचित्रै र्बहुभिर्मनोज्ञम्

९

दृष्ट्वा सरस्तद्धृदयातितप्तः
संश्चापि रामोऽनुबभूव शान्ति
मासीत् सरः पादपपंक्तिकूलं
सोपानशोभाललितं ललामम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१०

क्रौञ्चप्रियं सारसपक्षिरम्यं
कारण्डवैर्दिव्यवयोविचित्रै
र्भव्यञ्च मत्सीबहुवर्णभाभि
स्तुल्यं सतां तत् सभया विरेजे

११

नीरे सरोजानि मनोहराणि
हृद्यप्रभावन्ति ससौरभाणि
वासं स्वकीयं निदधुस्तथैव
कुर्वन्ति लोके सुजना यथात्र

१२

ब्रह्मेव मायावृतनिर्गुणं हि
पम्पातटाके सुषमासनाथेऽ-
प्यम्भोजपत्रावृततोयमत्र
सञ्जायते नेत्रगतं श्रमेण

१३

मीना जलेऽस्मिन् नितरामगाधे
कुर्वन्ति वासं च सुखेन शान्त्या
ज्ञानप्रभाभास्वरधर्मशीला
विद्यावदाता इव सौम्यसन्तः

१४

नानाविहङ्गाः पशवःपिवन्तो
नीरं तटाकस्य मुदं भजन्तः
सन्तीव दातुः सदने प्रभूताः
याच्ञाकृतो निर्मलमानसस्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१५

सम्प्रेक्षमाणश्च तटाकशोभां
रामस्ततोऽगाच्छबरीनिवास
मुत्थाय वृद्धा मुदिता भवन्ती
पूजां द्वयोर्भक्तिमती चकार

१६

पप्रच्छ रामः शबरीं त्वदीय
कच्चित् तपस्तापसि वर्धते नु
विघ्नेषु लब्धो विजयस्त्वया च
साफल्यमाप्तं नियमेषु कच्चित्

१७

चेतस्त्वदीयं लभते तु शान्ति
प्रीतिञ्च भद्रे गुरुवर्गसेवा
जाता मनोऽभीष्टफलप्रदा ते
आहारकोपौ नियतौ च कच्चित्

१८

रामस्य वाणीं शबरी निशम्य
जाता तपस्या सफला प्रभोऽद्य
जन्माद्य लोके सफलं मदीयं
सेवा गुरूणां फलदाभवच्च

१९

लब्ध्वा भवद्दर्शनमर्चनीयं
जातं पवित्रं मम जीवनं च
पुण्यानि जातान्युदितानि मन्ये
प्रोवाच रामं शबरीति भक्त्या


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२०

भूत्वा कृतार्था शबरी ततश्च
योगेन धाम प्रययौ पवित्रं
रामः सबन्धु र्हृदयप्रसन्न
श्चागादुदग्रं गिरिमृष्यमूकम्

२१

गच्छन् प्रदेशे वनराजिमध्ये
सर्वत्र शोभां विमलां विलोक्य
हृद्यां समुद्दीपनचारुयत्नां
रामश्चकम्पे कुसुमाकरस्य

२२

वेगेन वायोर्गुरुणा तरूणां
पुष्पाणि सर्वत्र भृशं पतन्ति
पुष्पैः समं क्रीडति वायुरेषः
मन्येऽधुना तीव्रगतिं दधानः

२३

हर्षप्रमत्ता भ्रमरा नगानां
शाखासु पुष्पैरभिभूषितासु
गन्धार्चितैः पत्रनवीनभाजां
गुञ्जन्ति भूयो मधुरं भ्रमन्तः

२४

उच्चो दरीनिर्गतवातशब्दो
गीतेन तुल्यः प्रतिभाति नूनं
वादित्रकार्यं कुरुते पिकस्य
वाणी तरून् नर्तयतीव वायुः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

गन्ध वहन् गन्धवहो हि मन्दः
प्राणिश्रमं पूर्णतया हिनस्ति
कुर्वन् मनोमोदमयं वसन्तः
कं नो जनः प्रीणयति स्वलक्ष्म्या

२६

मत्ता भवन्तः शिखिनो वसन्ते
नृत्यन्ति पक्षान् प्रियचारुशोभान्
तन्वन्ति ते चोपवने रमन्ते
सार्धं सुरम्ये हि निजाङ्गनाभिः

२७

कान्तारमध्ये सहकारवृक्षैः
सर्वत्र गन्धो निजमञ्जरीभि
र्व्याप्तीकृतस्तेन मुदं व्रजन्ति
तत्रत्य जीवा नितरामिदानीम्

२८

पुष्पश्रिया काननकर्णिकाराः
प्रीतिं प्रकृष्टां जनयन्ति पुंसा
मक्ष्णोश्च चित्ते धृतहेमभूषा-
देहा मनुष्या इव मोदमग्नाः

२९

क्षेत्राणि चक्षुःप्रियकान्तिमन्ति
विभ्राजमानानि दिशास्विदानीं
पीतान्यलं सर्षपपुष्पवृन्दै
र्भूत्वा च सर्वत्र विभां किरन्ति


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


३०

रक्तैः स्वकीयैः कुसुमैश्च पत्रैः
वृक्षा अशोका विपिनेषु वह्निं
प्रज्वालयन्तीव विभान्ति घोर
मेतान् मनो वीक्ष्य भृशं बिभेति

३१

भूत्वा प्रसन्ना मनुजा वनेषु
गायन्ति गीतानि मनःप्रियाणि
संश्लाघमाना वनिता वसन्तं
नृत्यन्ति तस्यागमने सुखेन

३२

गायन् गुणान् सः कुसुमाकरस्य
संवीक्षमाणो हृदयार्तिदूनः
सीतामरण्येष्वभिमार्गयंश्च
रामः प्रपेदेऽचलमृष्यमूकम्

३३

आराद् गिरिस्थः परिवीक्ष्य बन्धू
श्रीरामसौमित्रिधनुर्दधानौ
शौर्यप्रकृष्टाविव वीक्ष्यमाणो
सुग्रीववीरोऽपि भृशं बिभाय

३४

उद्विग्नचित्तः स दिशो ददर्श
शान्ति न लेभे भ्रमति स्म भीतः
कर्तुं समर्थो न बभूव चेतः
सन्निर्णयं मन्त्रिगणान्वितोऽसौ



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


३५

संत्रस्तचित्तो वदति स्म नैजान्
भीतो भवन् मन्त्रिजनांस्तदेति
सम्प्रेषितौ बालिमहाबलेन
वीराविमौ चापधरौ हि मन्ये

३६

नेतारमालोक्य भयाच्च भीतं
सर्वे तदानीमनुगामिनोऽपि
सुग्रीवमागम्य नितान्तभीत्या
चौर्णाविषुस्तं हि समन्ततस्ते

३७

वन्यान् मृगानाखुभुजः शुनश्च
शार्दूलशाखामृगदुष्टसत्त्वान्
चक्रुर्भृशन्तेऽथ पलायमानान्
स्याद् दुर्गमं येन च काननं तत्

३८

संत्रस्तसुग्रीवमवेक्ष्य धीमान्
ब्रूते स्म धीरो हनुमान् बलाढ्यो
भीतिं भवान् गच्छतु नो कदापि
नापत् समागन्तुमिह क्षमास्ति

३९

श्रेयस्करो मङ्गलभृच्छुभंयु
रद्रिर्महीयान् मलयोऽयमस्ति
तस्माद् भवान् बालिभयाद् बिभेतु
नो वीर सुग्रीव मनागपीह


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४०

बाली समर्थो न कदापि वीर
आगन्तुमत्राधमना दुरात्मा
तस्मान्न कार्यं भवता भयं हि
नैषीन्मनो मास्म भवान् विषादम्

४१

विद्यां धियं शक्तिमथ प्रकृष्टां
संश्रित्य नाना बहुसाधनानि
संशोभते शूर भवानिहाद्रौ
कस्मादशान्ति भजते च खेदम्

४२

आकर्ण्य सुग्रीव इदं तदीयं
वाक्यं वभाषे हनुमन् बिभेमि
दृष्ट्वा दधानौ शरचापखड्गान्
शूरर्षभौ द्वौ बलिनावहं तौ

४३

मन्येऽत्र दुष्टेन धनुर्धरौ तो
सम्प्रषितौ बालिदुरात्मना द्वौ
क्षोणीश्वराश्छद्मचरा भवन्ति
कापट्यमालम्ब्य सदा चरन्ति

४४

कृत्येषु बाली मतिमान् नयज्ञो
भूपा हि वेद्याश्छलिनोऽरिजाते
गुप्तैश्चरैर्नीतिविदां वरेण्यैः
कल्याणकाङ्क्षाहृदयैर्महीपैः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४५

श्रुत्वा वचस्तद् हनुमान् मनीषी
विद्वान् महान् राजनयप्रवीणो
ज्ञातुं रहस्यं ह्युभयोस्तयोश्च
वीरो ययावागमनस्य हेतुम्

४६

गत्वा राकाशे हनुमांस्तयोश्च
भिक्षोर्वसानो वसनानि शीघ्रं
वाचां विनीतो मधुरां बभाषे
ज्ञान्यग्रगण्यः श्रुतिशास्त्रविज्ञः

४७

वीरौ भवन्तौ तपसाभिदीप्तौ
देवोपमौ सुन्दररूपवन्तौ
कौ काननेऽस्मिञ्छरचापवन्तौ
भूत्वाऽभयौ द्वौ भ्रमतोऽस्त्रवन्तौ

४८

हेमाभतुल्याकृतिराजमानौ
चीराम्बरौ दीर्घभुजौ श्वसन्तौ
पम्पामरण्यं च वनस्य जीवान्
सौभाग्यवत्तां नयतो भवन्तौ

४९

सिंहोरुसत्त्वौ कतमं स्वदेशं
विच्छेददुःखं नयतो भवन्तौ
माता च का कश्च पिता भवन्तौ
जातौ च यौ धन्यतमौ भवद्भ्याम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५०

पृथ्वीधरश्चैष हि ऋष्यमूक
स्तेजोऽभिदीप्त्या भवतो गतोऽस्ति
चालोकपूर्णां सुषमां भवन्तौ
पुत्रौ नृपस्येति मतिर्मदीया

५१

प्राप्तौ कथ देशमिमं भवन्ता
वस्ति प्रभावो भवदीयदिव्य
स्तेजोऽतिदीप्ताद् भवतो हि भीतिं
जीवा वनस्थाश्च गता द्रवन्ति

५२

सुग्रीवनामा सुजनेषु वंद्यो
वासं विधत्ते गिरिऋष्यमूके
ज्येष्ठोऽस्ति बाली दुरिताध्वगामी
बन्धु र्दुरात्मा बलवांश्च तस्य

५३

साधोर्वराकी गृहिणी हि तस्य
दुष्टेन तेन प्रसभं हृतास्ति
जानातु मां धर्मभृतश्च तस्य
शूराग्र्य धीमन् सचिवं मनस्विन्

५४

सम्प्रेषितस्तेन महात्मनाहं
सख्यं भवद्भ्यां सह काङ्क्षति स्वां
तस्मिन् कृपामाचरतां भवन्तौ
एषास्ति याच्ञा मम वायुसूनोः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

श्रुत्वा वचस्तद् रघुवंशवीरो
रामोऽवदल्लक्ष्मणबन्धुमित्थं
वाग्मित्ववैदुष्यविदग्धतादि
संश्लाघमानः पवनात्मजस्य

५६

बन्धोऽस्ति सुग्रीवनृपस्य मन्त्री
वाग्मी च विद्वान् मतिमान् विनीतो
धन्योऽस्ति भूपः सचिवोऽस्ति यस्य
योग्यो मनीषी पवनात्मजोऽयम्

५७

श्रुत्वा श्रुतिज्ञत्वपदज्ञतेऽस्य
ज्ञाते प्रशस्तां भवतश्च वाणी
माकर्ण्य रामस्य वचस्तदानी
माचष्ट वाचामथ लक्ष्मणस्तम्

५८

विद्वन्नजायन्त गुणा मतिस्थाः
धर्मज्ञसुग्रीवमहात्मनो हि
आवां तमेवाद्य च मार्गयावो
वाक्यज्ञधीमन्गुणवञ्छृणु त्वम्

५९

उक्तं त्वया तत्कथनादिदं यद्
अङ्गीकृतं तत् सचिवावगच्छ
सख्यं सतां ज्ञानिजना जगत्यां
भूयः प्रशंसन्ति हि धीरवर्य्याः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

६०

सम्प्रेरितो बन्धुवरेण विज्ञः
सौमित्रिरूचे मम बन्धु रामो
ज्येष्ठोऽस्ति तस्यास्मि कनिष्ठबन्धु
र्नामोऽस्ति साकेतपुरेऽस्मदीयः

६१

आवामवेहि क्षितिशासकस्य
सूनू रथान्तस्य दशस्य राज्ञः
पित्राज्ञया तापसवृत्तियुक्तो
बन्धुर्निवासं विपिने करोति

६२

सीताभिधां सम्प्रति बन्धुजायां
भ्रात्रा सहाहं द्विज मार्गयामि
तां कोऽयमहार्षीज्जनकस्य पुत्रीं
नाम्ना च मां लक्ष्मण इत्यवेहि

६३

उत्साहसम्पन्नमतिप्रसन्न
उद्योगलीनः शुभमार्गगामी
प्राप्नोति सद्योऽभिमतं फलं स्वं
तस्माद् वयं तत्र रता विपश्चित्

६४

तां तस्य वाणीं निपुणं निशम्य
वायोस्तनूजोऽनुजलक्ष्मणस्य
चेतः समाधाय जयोपपत्तौ
सख्यं समं कर्तुं मियेष ताभ्याम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६५

दिष्ट्या भवद्दर्शनमद्य जात
विन्देज्जयं शीघ्रमरौ प्रयाय
सुग्रीव राजा शरणं भवन्तौ
श्रेयो हि धत्ते सुजनस्य सख्यम्

६६

अन्वेषणे स्याद् भवतोः सहायः
सुग्रीवराजा न च संशयोऽत्र
पुत्र्याः विदेहस्य हि नेतुकामः
सुग्रीव पार्श्वेऽस्मि वुधौ भवन्तौ

६७

उक्त्वेत्यसेधीद् हनुमान् विपश्चिद्
आदाय रामं सह लक्ष्मणेन
सुग्रीववास स्थलमृष्यमूकं
स्याद् येन रक्षा जगतीहितानाम्

६८

शङ्का न कार्या हनुमांश्चकार
दूराच्च सङ्केतमिति प्रधीन्द्रो
भीतिं परित्यज्य ययावभीतिं
सुग्रीवसाधुप्रकृतिस्तदानीम्

६९

भूत्वा सुखी राघवयोश्चकार
सुग्रीव आनन्दमना नितान्तं
सम्मानराजोचितवन्दनानि
प्रीत्या सपर्या वहुसाधनैश्च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


७०

नानाविधैः पुष्पफलैश्च पत्रै
 द्वारैश्च रम्भारचितैरनेकैः
रद्भिः पताकावलिभिः प्रसाधितो
 जातः क्षणेनैव स ऋष्यमूकः

७१

उल्लासपूर्णं व्यदधान्महीय
 उत्साहदीर्घं ह्यभिनन्दनं सः
सुग्रीवसौम्यो हृदयप्रसन्नो
 पूज्यस्य रामस्य च लक्ष्मणस्य

७२

विश्रम्य रामः सुखमानसः सन्
 आसीन आसीच्छरणं यदा स
सुग्रीव आगम्य सतां तदानीं
 रामं विनम्रो निजगाद भक्त्या

७३

धर्मज्ञ दीनोद्धरणे समर्थ
 तेजस्विवन्द्यस्तपसा महीयान्
आर्त्यार्तपुंसां शरणं भवांश्च
 प्रोचे हनूमान् भवतो गुणान् मे

७४

सत्कार एषोऽतितरां कृतो मे
 लाभो हि चेत्कर्तुमना महीयान्
सार्धं मया वीर उदार सख्यं
 क्वाहं वराकः क्व भवान् गरीयान्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

७५

चेद् रोचते सौहृदमीड्य राम
माकं मया बाहुमिमं मदीयं
गृह्णातु नैजेन च बाहुनाद्य
संरक्षणीयः शुभपुण्यमार्गः

७६

आकर्ण्य सुग्रीववचः प्रसन्नो
रामः स्वहस्तेन तदीयहस्तं
सम्पीडयामास च सस्वजे तं
तेजोनिधी राघवशौर्यसेव्यः

७७

वह्निं प्रदीप्तं कुसुमैस्ततश्च
सम्पूज्य कृत्वा च परिक्रमां तौ
अग्नेर्वयस्यत्वमुभौ प्रयाता
वन्योऽन्यमालिङ्ग्य गतौ न तृप्तिम्

७८

एकं सुखं दुःखमथावयोश्च
आवां वयस्यौ च परस्परं स्वः
सुग्रीव एतद् वचनं बभाण
रामं विलोक्यातिमुदा प्रसन्नम्

७९

मित्रस्य दुःखं परिवीक्ष्य मित्रं
नो जायते दुःखनिपीडितं यत्
तन्नूनमस्मिन् भुवने नराणां
निन्द्यं जघन्यं हतजीवनञ्च


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



८०

लोकेऽत्र मित्रं भवतीदृशं हि
सर्वञ्च यस्मिन् प्रकटीकरोति
प्रीतातिवैशद्यगतेन मित्रं
स्वान्तेन तस्मान्न परोऽस्ति बन्धुः

८१

लब्ध्वा भवन्तं गुणिवृन्दवंद्यं
सूर्यान्वयोद्भूतबलप्रकृष्टं
धानुष्कलोकार्चितकोविदाग्र्यं
धन्योऽस्मि जातो जगतीह राम

८२

सुग्रीव एतत्कथयन् सुशीलो
रामस्य मान्यस्य पदारविन्दे
जग्राह साश्र्वम्बक आदरेण
दैन्यात् तदा नो गदितुं शशाक

८३

आर्त्याकुलं वीक्ष्य दयालुराम
स्तं स्निग्धवाचा मधुरं जगाद
ह्याधिस्त्वदीयः पवनात्मजेन
संज्ञापितोऽभून्मयि सर्व एव

८४

नातः परस्तात् कुरु मित्र खेदं
त्वत्प्रेयसीग्राहिबलाभिमानी
क्षिप्रं हि बाली तव बन्धुदुष्टो
दुष्कर्मनिन्द्यस्य फलं लभेत

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

८५

निष्कारणं यस्त्वयि वैरबुद्धिः
स: कल्मषासक्तमना मदान्धः
एकेन वाणेन हतो भवेच्च
पापाः स्वपापैर्हि हता भवन्ति

८६

सामर्थ्यमाश्रित्य वरस्य बाली
गृह्णाति शौर्यं परकीयमर्धं
भूत्वा न तस्माद्धि तदुन्मुखोऽह
माच्छाद्य वृक्षेण हतं करिष्ये

८७

आकर्ण्य रामस्य वचो जगाम
शान्ति हि सुग्रीव-मनोऽब्रवीत् स
यामत्र चैकां घटनामपश्यं
तामेकदा राम भवान् शृणोतु

८८

आकाशमार्गे महिला हि काचित्
साक्रोश मुच्चैर्दधती विलापं
रामेति रामेति च लक्ष्मणेति
अश्रावि केनापि हृता ब्रुवाणा

८९

शैलस्थितान् वीक्ष्य बहूंस्तदानीं
नः प्राक्षिपत् सा निजभूषणानि
वासश्च दुःखाकुलमानसाऽभूद्
आकाशतः सङ्कटगृह्यमाणा


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



९०

सीतैव सासीदिति मद्विचारो
लङ्कापुरी शासकरावणेन
तस्याः अवश्यं हरणं व्यधायि
बुद्धिर्मदीयात्र दृढीयसीयम्

९१

व्योमाभियायी स्थविरो जटायुः
सार्धं तु जन्यं कृतवांश्च तेन
जातो हतो राक्षसरावणेन
आकाशवाण्याः अयमस्त्युदन्तः

९२

एतद् भवन्तं विनयेन वच्मि
कृत्वा विलम्बं न मनागिदानीं
सम्प्रेषणीयाश्चरबुद्धिमन्तो
ज्ञातुं च सत्यं समयोपयुक्ते

९३

उक्त्वेति वासश्च विभूषणानि
सुग्रीव आनेतुमथादिदेश
सर्वाणि रामस्य पुरश्च तानि
द्राक् स्थापितानि प्रवरानुगैश्च

९४

सम्प्रेक्ष्य वस्त्रञ्च विभूषणानि
रामो जगामातितरां विषादं
हन्त क्षणानन्तरमाचचक्षेऽ-
प्येतानि सीताविरहं सहन्ते

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

९५

धैर्यं गृहीत्वा समयं विमृश्य
पप्रच्छ रामः सह तेन वैरं
बध्नाति वाली तव बन्धुरेषः
कस्माच्च हेतोरिति शंस मां त्वम्

९६

पृष्टस्ततो राममवोचदेवं
सुग्रीव रामांघ्रिसरोजभृङ्गो
मायाविनामा दनुजः कदाचिद्
योद्धुं समं तेन च बालिनागात्

९७

स्त्रीहेतुवैरं निदधौ स तस्मिन्
भूत्वा ततो बालि महाबलाढ्यो
योद्धुं भवन् क्रुद्धमनाश्चचाल
जातेऽनुरोधेऽपि न तं स मेने

९८

बन्धुं तदा बालिनमन्वगच्छं
ज्येष्ठं स्वकीयं धृतभक्तिभावो
तौ द्वौ प्रविष्टौ विवरान्तराले
वाली तदा द्वारि बभाण माञ्च

९९

द्वारिस्थितस्त्वं कुरु मत्प्रतीक्षां
मासान् मया तत्र कृता प्रतीक्षा
सम्प्रेक्ष्य रक्तं हि विनिःसृतञ्च
तस्माद् बिलाद् दुःखमहं जगाम


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१००

भूत्वाघशङ्की निजबन्धु मृत्युं
मत्वा ततो भीतमना निवृत्तो
द्वारं पिधायाद्रिशिलामहत्या
दुःखाभिभूतो नगरीं स्वकीयाम्

१०१

पौरैश्च सर्वैरभिषिक्त एष
न्यायात् प्रजां शासितु मुद्यतोऽभूत्
जातस्तदेतः प्रबलो रियुं स्वं
हत्वा निवृत्तो मम बन्धुबाली

१०२

भक्त्या महत्या विनयेन बन्धौ
प्रोक्तो मयासौ घटिता स्थितिश्च
भूत्वा परं क्रुद्धमनाः प्रताड्य
निर्वासयामास पुराच्च मां सः

१०३

भार्यां मदीयां हृतवान् बलेन
सन्तप्तचित्तो विचरामि राम
त्रासात् तदीयादधुनात्र शैले
कालं स्वकीयं विमना नयामि

१०४

उक्त्वेति रामं सकलां व्यथां स्वां
दुर्धर्ष शक्ति बलिबालिनश्च
संसूच्य रामस्य बलञ्च वेत्तुं
प्रादीदृशत् सप्ततरूंश्च सालान्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०५

एतान् विभेत्तुं निदधाति शक्तिं
वाणो यदीयो वलिबालिनं सः
जेतुं क्षमः स्याज्जितदानवेन्द्र-
मायाविशक्त्यम्बुधिदुन्दुभिं तम्

१०६

जग्राह रामः स्वधनुः शरञ्च
श्रुत्वेति भेत्तुं तरुसप्तसालान्
भित्त्वा द्रुमांस्तान् सकलान् विवेश
पाताल लोके रघुनाथवाणः

१०७

भूत्वा प्रसन्नः प्रणनाम मूर्ध्ना
रामस्य पादाम्बुजयोः स वीरः
सुग्रीव ऊचेऽपि च तं प्रशंसन्
स्थातुं समर्थो भवतः पुरः कः

१०८

रामाज्ञया चाह्वयति स्म किष्किन्-
धामागतो बालीमहाबलाब्धिं
सुग्रीव वीरोऽति नदन् बलेन
श्रुत्वैव बाली निरगात् समन्युः

१०९

चक्रे प्रहारं कठिनं स वाली
सुग्रीववीरो निपपात भूमौ
भूत्वा नितान्तक्षतगात्रसर्वौ
रामस्य पार्श्वे द्रवति स्म दीनः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



११०

तं राम ऊचे भवतोर्द्वयोश्च
बन्ध्वोः समानाकृतिवर्णवत्त्वात्
क्षिप्तो न वाणो भृशशङ्कया च
कण्ठस्थमालो भव याहि भूयः

१११

कृत्वाथ तं तादृशमेव राम
स्त्रस्तं भृशं बालि कठोरघातात्
प्रातिष्ठिपत् तं द्रुतमेव योद्धुं
रामोऽपि तस्थौ च तदुन्मुखः सन्

११२

आस्तां यदा जन्यरतौ च तौ द्वा
वुद्दिश्य रामः शठबालिनं तं
चिक्षेप तीव्रातिशय स्ववाणं
प्राणांस्तदीयान् स इषुश्चकर्ष

११३

रामायदत्त्वाङ्गदपुत्रनैजं
सुग्रीवबन्धौ निदधच्च मानं
प्राणान् स्वकीयानजहात् स बाली
रामस्य पादाम्बुजदत्तचित्तः

११४

रामः समाश्वास्य सुतं च पत्नीं
बन्धुञ्च सुग्रीवमसौ तदीय
मन्त्येष्टिसंस्कारमचीकरच्च
शोकाकुलस्वान्तधराङ्गदेन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


११५

सिंहासने चासयति स्म रामः
सुग्रीबलोकोदयलग्नचित्तं
क्षिप्रं स्वकीयानुजलक्ष्मणेन
पित्राज्ञया नैव पुरीमयासीत्

११६

सिंहासनस्थे सति शीघ्रमेव
रामोपकारज्ञवयस्यधर्मं
वेत्ता स्वकर्त्तव्यदिशां स्वकीयं
चिक्षेप चेतो वहुसावधानः

११७

सुग्रीवशास्ता निजमन्त्रिवर्गं
मामन्त्रयामास विचारणार्थं
श्रेष्ठो हि कार्यो जनकात्मजाया:
अन्वेषणार्थं क इति प्रयत्नः

११८

क्षिप्रञ्च सर्वासु दिशासु योग्याः
अन्वेषणार्हप्रतिभाप्रदीप्ताः
उत्साहवन्तो वलवद्वरेण्याः
सम्प्रेषणीया जवनप्रगल्भाः

११९

निश्चित्य सुग्रीव इयाय राजा
रामस्य पार्श्वे सह मन्त्रिभिश्च
तस्याङ्घ्रिपद्मेषु निधाय मौलिं
प्रह्वोभवन् सादरमित्युवाच


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१२०

अन्वेष्टुमद्यैव वयं च सीता
मम्बां सुयोग्यान् जवनान् विदग्धान्
प्रेष्यान् बलाढ्यान् कृतनिश्चयाः स्मः
रामप्रभो प्रेषयितुं कृपालो

१२१

आकर्ण्य सुग्रीववचोऽनुकूलं
प्रेष्याश्च के सन्ति चराः प्रवीणाः
इच्छामि तान् द्रष्टुं मह सुयोग्यान्
सुग्रीवकार्यज्ञ जगाद रामः

१२२

धीमान् हनूमान् जवनान् विदग्धान्
सम्प्रस्तुतांस्तान् व्यदधाद् विपश्चिद्
रामस्य सर्वान् पुरतस्ततश्च
विख्यातचातुर्यचरप्रगल्भान्

१२३

सम्प्रेक्ष्य रामो द्विरदेन्द्रकायान्
सिंहोरुसत्त्वांस्तरुणाग्रगण्यान्
भीमान् प्रवीणान् नगराधिवासान्
उत्साह दीप्तान् मुदितोबभूव

१२४

रामः परिष्वज्य मुदा भुजाभ्यां
सुग्रीव मब्रूत स धर्मधाम
प्रीतिं वयस्यस्य भवन् कृतज्ञो
जानासि धन्यस्त्वमसि प्रधौन्द्र


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१२५

प्राचीं दिशां श्रीविनतादिवीरान्
वीरान् सुषेणादिभटान् प्रतीची
माशामुदीचीं प्रति मेनिनीपो
बल्यादिकान् यातु मथादिदेश

१२६

यातुं ह्यवाचीं द्विविदाङ्गदादीन्
आज्ञापयामास तदा विशिष्टान्
सुग्रीव ऊचे हनुमत्सुधीन्द्रं
तस्मिंश्च काले शृणु वेदितव्यम्

१२७

श्रीरामचन्द्रः शरणं मुनीनां
धर्मात्मनां तापस सज्जनानां
त्वां वक्तुकामो गमनाच्चपूर्वं
स्नेहेन सः पश्यति बुद्धिमंस्त्वाम्

१२८

वातात्मजो रामपदाब्जयुग्मं
नत्वा नतः साञ्जलिरित्युवाच
प्राप्तुं ह्यनुज्ञां भवतः प्रभोऽहं
सन्तिष्ठमानोऽस्मि समुत्सकः सन्

१२९

मन्ये भवान् यां ककुभं यियासुः
प्राप्ता भवेत् तत्र विदेहपुत्री
चोक्त्वास्मदीयं कुशलं तदर्थं
तस्याः शिवञ्चापि विदाङ् करोतु


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१३०

भाषस्व सीतां विरहस्त्वदीयो
जातो ह्यसह्यः परमप्रचण्ड
श्चन्द्रो गतो भास्करतामिदानीं
क्लिष्णाति भूत्वा प्रकृतिर्विरुद्धा

१३१

भाषै च किं त्वत्सविधे मम त्वां
चेतो निवासं कुरुते ह्यतस्त्वं
जानासि सत्यं दयिते समग्रं
प्रेम्णोऽधिवासोऽनिशमेव तत्र

१३२

सम्प्रेष्यते त्वत्सविधे मयेमां
तुभ्यं मरुन्नन्दन ऊर्मिकेयं
दातुं स्थितोऽयं कथनाय चैतद्
धैर्येण कालं नय नो विलम्बः

१३३

उक्त्वेत्यभिष्वज्य च वातसूनुं
प्रीत्या च सर्वांश्चरतिग्मबुद्धीन्
प्रस्थापयामास सलक्ष्मणोऽसौ
सार्धं च सुग्रीवनृपेण रामः

१३४

तस्मश्च काले गगनं दिशाश्च
भूमण्डलं स्वेन रवेण सर्वं
सम्पूरयन्तो भटवृन्दभीमा
आकम्पयामासुरनन्तभीत्या

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५

राजा ततस्तै: सह यत्र राघव:
सौमित्रयुक्त: शिखरे गिरे: स्थित:
ग्रासीन्महोल्लासमना: समाययौ
कृत्वा नभ: स्वत्तनय पुरस्कृतम्

६

सर्वेऽपि रामस्य च लक्ष्मणस्य ते
पादारविन्देषु शिरांसि सादरं
प्राणीनमन् साञ्जलयो मुदानना
वन्धुद्वये प्रीतिगते मिमेल च

७

सुग्रीवभूपोमुदितो भवंस्तत:
सर्वं च तत् तन् निजगाद राघवं
यद् यद्धनूमान् कृतवान् स्वपौरुषं
साफल्य युक्तं मतिमान् महाबल:

८

ग्रम्भोधिमुल्लंघ्य समीरनन्दनो
लङ्कां प्रतस्थे प्रथमं महामति:
सीता मशोकप्रमदावने तत:
सम्भाग्र्य लेभे कृशखिन्नमानसाम्

९

ग्राश्वास्य तां रम्यवनं महावलो
विध्वंसयामास सरक्षकान्वितं
व्यापादयामास स मन्त्रिपुत्रं
बहून् भटान् राक्षसभीमविक्रमान्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०

अक्षं कुमार निहत यदाव्यधाद्
ब्रह्मास्त्रबद्धं विदधौ च शक्रजित्
तं वीरवर्यं हनुमद्वरेण्यं
निन्ये च पार्श्वे नृपरावणस्य सः

११

लङ्कापती रावण आप्नुताधिक
क्षोभञ्च रोषं प्रसभ स्वसेवकान्
आज्ञापयद् वानररूपधारिणो
दग्धुं हि लाङ्गूलविशालतागतम्

१२

लाङ्गूलदग्धो हनुतांस्ततो बली
लङ्का समस्तां दहतिस्म सत्वरं
सर्वेऽपि हा हेति विधाय राक्षसाः
सर्वस्वनष्टाः रुरुदुः प्रताडिताः

१३

लङ्का विनष्टां वलवानयं महान्
कृत्वा च सीताकुशलं महामतिः
सम्प्राप्य चिह्नं च ततः शिरोमणि
कार्यं हनूमान् कृतवान् यशः प्रदम्

१४

स्तुत्यं च गेयं ह्यभिनन्दनोचितं
कार्यं निशम्यातितरां प्रसन्नतां
रामो गतो वायुसुतं स्ववक्षसा
चालिङ्ग्य भूयः प्रशशंस सादरम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१५

रामस्तदानीं कृतकृत्यतां दधत्
सुग्रीवमूचे भवदीयसौहृदं
सीतासमाचारप्रदं ह्यजायत
जातः कृतज्ञो भवति क्षतापतौ

१६

आकर्ण्य रामस्य गिरां नतो भवन्
सुग्रीव ऊचे चरणौ स्पृशन् मुहुः
कार्यं समग्रं भवतः कृपावशात्
सम्पन्नतां प्राप्त मभून्मम प्रभो

१७

सन्तः स्वयञ्चाददते न कर्तृतां
ते कामयन्ते सततं भवन्तु ते
श्रेयोगता मानगता यशोगताः
भक्ति प्रगाढ़ां दधते हि तेषु ये

१८

हे दीनबन्धो करुणानिधे प्रभो
आर्तार्ति विध्वंसनदक्षकार्मुक
कुनीतिवर्मश्रित हन्तृ पौरुष
पापाभिलिप्तार्दनलब्धकौशल

१९

लङ्कापती रावणराक्षसेश्वरः
सीता महार्षीद्धुना विषीदति
साशोकवृक्षोपवने दुरात्मनो
दुःखान्य सह्ययान्यनिशञ्च विन्दति



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२०

ज्ञातं यदा जात मिदं तथा कथं
कार्यो विलम्बोऽत्र वरूथिनीं प्रभो
चादाय लङ्कानगरीं रिपोर्द्रु तं
रुन्धां भवान् मेऽस्ति निवेदनाधुना

२१

अस्मन् महापौरुषवायुनन्दनो
वीराग्रणी नीतिविचक्षणो महान्
अह्नो भवन् प्रार्थयते कृपानिधि
हन्तुं रिपुं द्राक् चलतात् परन्तप

२२

उत्थाय वीरप्रथमो महामतिः
सीताव्यथास्ता अभिधाय राघवं
मौलिं स्वकीयं नमयंश्च सादरं
प्रस्थातु मीड्यं वनुतेस्म तत्क्षणम्

२३

श्रीरामचन्द्रः समयं यथोचित्तं
दृष्ट्वा मुहूर्ताद्यनुकूलतां शुभां
देवं गणेशञ्च तदा शिवां शिवं
ध्यायन् नमस्यंश्चलितुं समादिशत्

२४

लब्ध्वा परामर्शमथ स्वमन्त्रिणां
सुग्रीव ऊचे हनुमन्महामतिम्
अस्मत्समस्तां विविधामनीकिनीं
प्रस्थानहेतो वंद सैन्यनायकान्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

उत्साहविद्युद्गतिना वरूथिनी
जातोद्यता नायकपुंगवाज्ञया
शंखादिभेरीबहुतूर्यनिस्वनै
रष्टापि चाशा नितरां प्रपूरिता:

२६

लोका: समस्ता मुदिता अभूवन्
जाता धरित्री तु भृशं सुखं गता,
सा वेपथुव्याजमुपागता तदा
व्यक्तञ्चकार स्वप्रसन्नताधिकाम्

२७

सर्वे च सेनापतयो जगच्छ्रुता:
श्रीलक्ष्मणांघ्र्यम्बुजशासनस्थिता:
लङ्कां निरोद्धुं तरसा महौजसौ
नत्वा प्रचेलू रघुनाथलक्ष्मणौ

२८

वत्साङ्गदं सैन्यपतिं बलोत्तमं
कृत्वा वरिष्ठं च विधाय रक्षकं
श्रीजाम्बवन्तं द्विविदं नलप्रियं
मैन्दञ्च नीलं व्यदधान् नृपोऽग्रियम्

२९

सेनागमत् सागरकूलमुत्तमं
भीतिं स्वशत्रो हृदये च कम्पनम्
उत्पादयन्ती बलसाधनोद्यता
रोषं श्रयन्ती प्रबलं भयङ्करम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



३०

कूले समुद्रस्य मनोहरश्रिया

विभ्राजमानं सकलाश्च सैनिका:

प्रातिष्ठिपं श्चाम्ब्ररसद्ममण्डलं

संगुञ्जयन्त: ककुभोनभोऽखिलम्

३१

क्रीडासुलग्ना विविधानि सैनिका:

भोज्यानि मिष्ठान्नफलादिकानि च

भुक्त्वा पिवन्तश्च रसंसुधोपमं

तीरे समुद्रस्य च तेऽभ्रमन्मुदा

३२

श्रीरामचन्द्रो जलधेस्तटोत्तमे

रामेश्वरं शास्त्रविधानपूर्वकं

संस्थापयामास हि भक्तिचेतसा

सम्पूजयामास मनोरथप्रदम्

३३

श्रुत्वा च वृत्तं तदितो हि रावणो

वृन्दाच्चराणां रजनीचराधिप

आमन्त्रामास च मन्त्रिमण्डलम्

आदाय कार्याचरणाय तन्मतिम्

३४

प्रोचे स नीतिज्ञवरान् स्वमन्त्रिणो

लङ्काधिराजो विजयोऽस्ति कोविदा:

मन्त्रप्रधानो निगदन्ति मन्त्रणा

मादित्सुरस्मीति विदन्तु साम्प्रतम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



३५

मन्त्रोऽस्ति पञ्चाङ्ग इति प्रधीश्वराः
वदन्ति तं ते रहतेऽत्र नेहसं
नोऽतस्तमुद्दिश्य भवद्भि रुच्यतां
नीतिं परज्यानिनिजोदयां च ताम्

३६

रामः प्रपन्नो जलधेस्तटेऽधुना
सैन्यान्वितोऽसौ तरसा पुरी मिमां
संरोत्स्यतेऽतो भवतां हि सम्मति
र्ग्राह्यास्ति काले समरोन्मुखे वुधाः

३७

आकर्ण्य वाक्यं ब्रुवतेस्म मन्त्रिण
श्चिन्ता न कार्या भवतेह सम्प्रति
वीराग्रणीशक्रजितः पुरो हि कः
स्थातुं समर्थो बलवन् महीतले

३८

वज्रप्रहस्तादिनिकुम्भ दुर्मुखा
स्तत्राब्रुवंश्चण्डबलं भयङ्करम्
उदीरयन्तः सकला मनीकिनीं
हन्तुं समर्था वयमेव सर्वथा

३९

सुग्रीवरामाङ्गदलक्ष्मणादिका
स्ते भोज्यतुल्याः अखिलाः कृते हि नः
तस्मान्न कार्यं भवतात्र चिन्तनं
मांसाशनानां पुरतः क्व ते नराः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४०

ते वस्तुतो राक्षसमन्दबुद्धय
आसंश्च सर्वे प्रभुचाटुकारिण:
कल्याणकारीणि वचांसि नो च ते
नीतिं विदन्ति स्म शुभंयुतामयीम्

४१

ऊचे ततो नीतिविदां वर: सुधी:
कल्याण युक्तं वचन विभीषणो
राजन् ब्रुवेऽहं नतमस्तको भवन्
विद्वान् भवान् नीतिविदां शिरोमणि:

४२

साम्ना च दानेन च भेदमाधनात्
सिद्धं भवेद् यन्न बुधै रुदीरितं
शक्त्यास्ति साध्यं सुजनै र्विचक्षणै:
कार्यं हि तत् साधुवरैर्नयोत्तमै:

४३

शक्तिस्तु साफल्य मुपैति तेषु च
ये सन्ति दैवप्रहता: प्रमादिन:
शत्रुप्ररुद्धाश्चिररोग पीडिता:
रामो न तादृङ् मनसीति गृह्यताम्

४४

क्रोधो हि रामेण जितोऽस्ति सर्वथा
स: सावधान: सततं क्षणेक्षणे
सैन्यान्वितोऽसौ विजयेऽनुरागवान्
धीरं दुराधर्ष ममुं जिगीषसि


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४५

शक्त्यामवज्ञा न रिपोर्निधीयतां
कामं भवेद् वो विपुलं बलं महद्
वीर्यं तु यद् वायुसुतेन दर्शितं
तन्नानुमेयं भवति स्म धीमता

४६

जानाति रामो जगती सदूषणं
व्यापादयामास खरं रणाजिरे
वाली बलौधो बहवश्च राक्षसा
व्यापादितास्तेन बलाढ्य भीषणाः

४७

सीतास्ति मूलं भयसङ्कटापदां
तस्मात्प्रदेया भवता विपश्चिता
यावन्न लङ्का रजसि प्रलीयते
रामस्य बाणैर्निशितै र्भयङ्करै

४८

यावन्न घोरा महती वरूथिनी
दुर्धर्षशौर्या रणचण्डसाहसा
लङ्कां न नो दारयते मनोरमां
तावत् प्रदेया रघुनन्दनप्रिया

४९

लङ्का विनष्टा भविता च राक्षसा
व्यापादिताश्चापि समस्तसम्पदः
स्युः पांसुमग्ना भवनानि भूरजो
लीनानि सर्वाणि न चात्र संशयः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५०

पादारविन्दे भवतश्च साञ्जलि
बन्धो स्पृशामि प्रणतेन मौलिना
तत्प्रार्थनां तात करोतु साम्प्रतं
स्वीकारयोग्यामनुरोधकारिणीम्

५१

मुञ्चाशु रोषं धनधर्मनाशकं
सेवस्व धर्मं बलदं यशस्करं
जीवेम दारैस्तनयः सम वयं
रामाय देया जनकात्मजा द्रुतम्

५२

वाक्यान्यवज्ञाय निशाचरेश्वरः
प्रासादनैजं स्वविभीषणस्य सः
सर्वान् विसर्ज्याशु जगाम रावणो
दैवे विरुद्धे हि मतिर्विनश्यति

५३

लङ्केश्वरं बन्धुविभीषणः पुनः
कल्याणकृद्वाक्यचयैरबोधयद्
दुर्बुद्धिनक्तञ्चररावणः परं
पादप्रहारेण निरादृतं व्यधात्

५४

वाक्यैः कठोरैरपमानितं भृशं
कृत्वा च बन्धुं निरजीगमद् गृहाद्
भूत्वातिदुःखी शरणं स राघवम्
आर्त्तार्तिहन्तारमसौ जगाम च



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

संशिश्रियरे तत्र भृशं विभीषणे
सत्यागते रावणबन्धुवन्धुरे
सुग्रीवसेनापतयो यदा च तं
तत्त्वावबोधाय हि तेऽधरस्तदा

५६

रामो यदा तत्र कृतोऽवबोधितः:
शङ्का न कार्या शरणागते जने
उक्त्वेति रामो निकटे विभीषणम्
आहूतवान् सादरमा मिलत्ततः

५७

यत् कारणं चागमनस्य वर्तते
तत्सर्वमेवाभिदधौ विभीषणो
दुष्टस्वभावादिदमेव सम्भवं
रामो निगद्येत्यभयं चकार तम्

५८

कृत्वाभिषिक्तं जलधेर्जलेन तं
रामः सहर्षं प्रणतं विभीषणं
लङ्केश उक्त्वेति चकार सत्कृतं
प्रीत्या च तं गौरवमानपूर्वक्रम्

५९

सौमित्रिसुग्रीव समीरनन्दनाः
अन्यान्यसेनापतयश्च सैनिकाः
सर्वापि रामस्य वरूथिनी तदा
वर्धापयामासुरमुं विभीषणम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६०

आज्ञा ततोऽभूत् तरितुं महोदधिं
सेतुं विधातुं प्रबलोत्तमोचितं
दक्षाभियन्तृप्रथितातिकर्मठाः
कार्ये प्रवृत्ता हृदयेन तत्र च

६१

रामस्य सेनादिपरां स्थितिं ततो
दूताविती ज्ञातुमथागतौ तटे
सम्प्रेषितौ रात्रिचराधिपेन च
सैन्याधिवासाकुलिते विचक्षणौ

६२

ज्ञाताभवद् दूतनिगूढता परं
बद्धावभूतां पुरतश्च सत्वरं
नीतौ तदानीं प्रियलक्ष्मणस्य ता
वास्तां नयज्ञौ भयभीतमानसौ

६३

आगोऽस्मदीयं क्षमतां दयादिधे
भृत्या वय स्मः क्षणदाचरप्रभोः
प्राणास्तु नस्तस्य कृपाश्रिता इमे
नात्रार्थतः कोऽप्यपराध एव नः

६४

कृत्वा दयां लक्ष्मणदीनवत्सल
उन्मोचयामास चरौ पराश्रितौ
पत्रं प्रदत्ते स्म च रावणाय सः
सीतां प्रदातुं हितमन्यथास्ति न


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६५

पत्रं गृहीत्वा विनयेन सादरं
नत्वा च तौ द्वौ शुचिशीललक्ष्मणं
लङ्कापुरीं स्वां ययतुर्मुदान्वितौ
रामं स्तुवन्तावनुजं च तस्य तौ

६६

पत्रं च तच्छ्रावयितुं स्वमन्त्रिणे
प्रादापयद् रावणशर्वरीचरः
श्रुत्वा हृदुन्मत्तविकत्थनप्रियो
दुर्दैवदुर्बुद्धिवशंगतोऽहसत्

६७

धर्तु स्वहस्तेन नभो हि वामनो
वाञ्छां विधत्ते तरितुं च सागरं
मोहादगाधादुडुपेन दुर्मति
र्यो योद्धकामः सह राघवो मया

६८

जल्पाक एषोऽस्ति कनिष्ठतापसो
नूनं न जानाति स रावणोद्भटं
विख्यातशौर्यं रिपुगर्वनाशकं
संसारजेतारमगाधसद्बलम्

६९

एतौ विभीतौ वनवासितापसौ
मत्तस्तदा तौ कुरुतां पलायनं
तौ द्वौ दयेतां निजजीवनप्रिये
नो रावणो हन्ति रणात् पलायितम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



७०

रामाय दत्ता हि भवेन्न जानकी
तां याचतां मां न कदापि रावणं
रामो वराको बलहीनतापसो
वीरार्थमेवास्ति सदैव सुन्दरी

७१

उक्त्वावरोधं गतवानिति प्रिया
मन्दोदरी तत्र भृशं न्यवेदयत्
सीतां प्रदातुं भ।वतुं च युद्धतो
दूरे परं नो व्यजहाद् धठी हठम्

७२

धर्मच्युता निन्द्यदुराग्रहस्थिता:
मानावलेपोद्धतशौर्यचञ्चला:
उन्मत्तचित्ता: परमप्रमादिन:
कालेन लोकेऽपि पतन्ति गच्छता

७३

रामस्य सेना सुदृढेन सेतुना
चाम्भोधिमुत्तीर्य पुरीमितो गता
सौर्णोच्च तां सत्वरमेव सर्वथा
लङ्काजना भूरि चकम्पिरे तदा

७४

उद्याननाशक्षमबाहुभीषणं
नक्तञ्चरध्वंसनदृष्टपौरुषं
विशाललङ्कादहने विशारदं
स्मृत्वा च ते वायुसुतं ह्यधौषिषु:



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

७५

तस्मिश्च काले परिवीक्ष्य भीषणान्
दुर्धर्षसत्त्वान् बहुभीमविग्रहान्
उर्वीधृसंहारसमर्थसैनिकान्
सिंहोपमांस्ते नितरामधाविषुः

७६

जाते प्रभाते सचिवान् हि राघव
आकार्य सर्वान् परिपृच्छति स्म च
ब्रूतोचितोपायकलापपेशल
मूचे प्रियं कोविदजाम्बवान् वचः

७७

तेजोमनीषाबलधर्मसागर
मन्त्रं ब्रुवेऽहं गुणसद्म सुन्दर
श्रोतुं भवान् नाथ मनाक् कृपानिधे
स्वानुग्रहं नाथ करोतु साम्प्रतम्

७८

सम्प्रेषणीयोऽङ्गदवीरसत्तमो
दूतं विधाय प्रतिबोधनाय सः
प्रस्ताव एषः परिपोषितोऽभवत्
सर्वैः सुधीभिः सचिवैः प्रियः पुनः

७९

प्रोवाच रामो बलबुद्धिबन्धुरं
वीर प्रयाह्यङ्गदशक्तिसागर
लङ्कां मदीयार्थवशेन सम्प्रति
योग्ये प्रवीणे त्वयि किं वदान्यहम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

८०

सिद्धं भवेन्नः सकलं ममेप्सितं
स्यात् तस्य भद्रं च करोतु शक्तिमन्
यत्नं समीचीनतया विचार्य तं
वाञ्छामि नो स्यात् समरं विनाशकम्

८१

पापश्रितं निन्द्यमधर्मपोषितं
मार्गं प्रयाति क्षितिपोऽनयस्थितः
कष्टानि विन्दन्त्यपराधनिर्गताः
हा हन्त दुःखानि प्रजाः सुमार्गगाः

८२

सेनाचराश्चैव सहस्रशो हता
जन्याजिरे ध्वंसपरे निरागसो
बद्धाः क्रियन्ते शतशश्च दण्डिता
स्तत्रपराधी दुरितस्थभूपतिः

८३

अन्यायरागी जनतामहारिपुः
स्वार्थान्धलक्ष्मीसुखभोगमानसः
सम्पत्तिशाली मलिनेषु कर्मसु
भूपोऽनुरागी जगतीं क्षिणोति हा

८४

राष्ट्रं समग्रं कुचरित्रशासक
स्तस्याधिकारस्थितमन्त्रिमण्डलम्
उच्चा अनेके सचिवादिपूरुषाः
भूत्वा कुवृत्ताश्च निपातयन्त्यपि



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



८५

क्षीणं नितान्तं बलहीनजर्जर
राष्ट्रं निरुन्धे च दुनोति कृन्तति
देशान्तरं वा रिपुरन्य एव च
हेतुस्तु शास्तैव हि तत्र पातने

८६

तस्माद्धराशासनकारिभि: सदा
भाव्यं सदाचाररतै: सदध्वगं:
राज्ये हि तेषां धनधामयोषित:
स्यू रक्षिता स्याद् विषय: समृद्धिमान्

८७

भाषस्व लङ्काधिपतिं कुवर्त्म स:
हित्वा सदाचारपरो भवेद् द्रुतं
श्रेयोऽस्ति तस्यापि नृणां महत् सुख
युद्धाद्धितं नो विषय: प्रयाति

८८

नत्वाभिरामं रघुवंशभूषणं
लङ्कां ययौ रावणसन्निधौ तत:
शूरो महान् विश्रुतबालिनन्दनो
मेधाविवीर: प्रभुरामसेवक:

८९

सम्प्रेक्ष्य तं भीतहृद: स आगतो
जाता जना येन विमृश्य न: पुरी
दग्धा न विद्मो नियति: किमिच्छति
चिन्तानिलीना इति सर्वराक्षसा



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६०

प्राप्तः सभां रामपदाम्बुजं स्मरन्
लङ्कापतेर्धीरवरौघनिर्भयः
सिंहस्य धीमान् गतिमाश्रयंञ्छनै
स्तेजः स्यकीयं विकिरन्नितस्ततः

६१

नक्तञ्चरो रावणराक्षसाधिपं
नत्वा च तस्यागमन न्यवेदयत्
आज्ञापयत् सः स्मितवक्त्र आनय
क्षिप्रं कुतस्त्यः स इति व्यभाषत

६२

आसीदसावञ्जनभूधरोपमः
शाखा इवासन् विटपस्य बाहवो
रोमावली तस्य लता इवाबभु
र्नासाक्षिवक्त्राणि दरीव तस्य

६३

तं तादृशं वीक्ष्य न चाप्यशङ्कत
वीराग्रणीः सन्मतिबालिशावको
दृष्ट्वोदतिष्ठन् सकलाः सभासदः
सेहे न तेषां स तमादरं तदा

६४

सिंहो यथा मत्तगजेषु गच्छति
वीरस्तथागात् सदसि प्रधीप्रियो
नत्वासने मन्त्रिगणं सरावण
रामप्रतापं निषसाद सः स्मरन्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



९५

पृष्ट: स नक्तञ्चरनाथमब्रवीद्
दूतोऽस्मि रामस्य महायशस्विनः
श्रीकोशलेशस्य सतांमहीयसो
धर्माभिरक्षैकमतेर्गरीयसः

९६

पित्रा सम मे भवति स्म मित्रता
तस्माद्धितार्थं भवत: समागतो
वंशे पुलस्त्यस्य भवानजायत
ह्याराधक: शङ्करपार्वतीपतेः

९७

प्राप्तो वरो भूपतयो जिता: क्षितौ
सर्वेऽपि लङ्केश च लोकपालका:
ख्याता जगत्यां भवतोऽत्र शूरता
तेजोनिधे रावण राक्षसेश्वर

९८

दर्पाच्च मोहाज्जनकात्मजा हृता
रामस्य पत्नी भवतास्ति जानकी
भाषे शुभं स्वीकुरुतां निवेदनम्
आगांसि मृष्येद् भवतश्च राघव:

९९

सीतां पुरस्कृत्य सबन्धुबान्धवो
वक्त्रे तृणं त्वं निदधच्चलाभयं
त्रायस्व मां त्वामिति स: करिष्यति
सम्भाषमाणं प्रणतार्तिनाशक:



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१००

रे पोत भाषस्व भवन् समाहितो
जानासि नो मां जगतीजयिप्रभुं
पित्रा समं ते मम सौहृदं कथं
ब्रूहि स्फुटं प्रत्ययकारकं वचः

१०१

बाहूटजे त्वां विदधौ पिता मम
त्वां वन्दिनं किं स्मरसि स्वकीये
श्रुत्वेति सङ्कोचमियाय रावणो
जातोऽस्ति बालीति जगाद चाङ्गदम्

१०२

तस्यासि पुत्रस्त्रपसे न पामर
जातो मृतस्त्व न कथं कुलाधम
यत् स्वेन वक्त्रेण हि दूततां वदेः
स्वस्याधुना तापसकाननौकसः

१०३

त्वं साम्प्रतं ब्रूहि तदीयमङ्गलं
श्रुत्वेति स व्याहरति स्म सस्मितं
यातैर्दिनैस्त्वं दशभिर्दिवं गतः
पृच्छ स्वमित्रं कुशलं मिलन् मुदा

१०४

आकर्ण्य वाणीं परुषां स रावणो
जानामि नीतिं ह्यत एव पामर
वाणीं सहे तेऽनुचितां च गर्हितां
तूष्णीं भव त्वं न च वेत्सि रावणम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०५

जानामि धर्मप्रियतां नयज्ञतां
त्वां वेत्ति लोकः शुभमार्गगामिनं
ज्ञात्वैव धर्मं हृतवांश्च जानकीं
धन्यं हि धर्माचरणं तवेदृशम्

१०६

जागर्ति लोके तव धर्मभीरुता
धन्योऽस्मि लब्ध्वा तव पुण्यदर्शनम्
आकर्ण्य रोषं व्रजति स्म रावणो
व्यङ्ग्यार्थपूर्णातिकठोरतद्वचः

१०७

उत्थाप्य कैलासगिरिं हि मानसं
शम्भोर्भृशं नन्दयति स्म रावण
एतां न शक्ति मम कोऽवबुध्यते
चेतो व्यधात् सा नकितं नभःसदाम्

१०८

तद्दर्पवाक्यं हृदये त्वजीजनत्
कोपं भृशं बालिसुतस्य तत्क्षणे
को वर्तते त्वत्सदसि प्रकर्षवान्
यश्चालयेन्मच्चरणं जगाद सः

१०९

सर्वेऽपि वीराः सदसि स्थितास्तदा
कर्तुं न चार्हंश्चलितं भटोद्भटाः
पादं तदीयं विहितेऽपि पौरुषे
ह्रीणा निषेदुः सकला निजासने



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



११०

वीक्ष्योत्थितं रावणमङ्गदो बली
श्रेयो न पादग्रहणे तवास्ति मे
त्वं याहि रामं शरणं नतो भवन्
भद्रं भवेत् तच्चरणाश्रयेण ते

१११

वीर प्रबोध्यातितरां हि रावणं
साम्ना बलेनापि भयं निधाय च
नैजं प्रभावं च विकीर्य सर्वथा
स्थानं ययौ श्रीरघुनन्दनं स्मरन्

११२

सन्दर्श्य मौलिं रजनीचरेश्वरः
सीतामितो रामसमाप्तिसूचकं
दुःखोदधौ पातयति स्म पामर
श्चक्रे विलापं नितरां क्लमं गता

११३

तां जानकीं क्रन्दनकारिणीं भृशं
प्राबोधयत् त्वं न च याहि वेदनां
मायेति लङ्कापतिरावणस्य सा
ह्याचष्ट तस्याः सरमाभिधा सखी

११४

नक्तञ्चरा रावणसन्निधावितो
गत्वा गदन्ति स्म पुरीं वरूथिनी
रामस्य रुन्धे महती बलीयसी
श्रुत्वेति कोपं प्रययौ पुरीपतिः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



११५

प्रावर्तत द्वन्द्वरणं भयङ्करं
सेनाचराणामुभयोश्च पक्षयो:
वीरोद्भटा दारुणयुद्धघस्मरे
चक्रु: प्रहारं परुषं परस्परम्

११६

दुर्धर्षशौर्याब्धिमकम्पनाभिधं
क्रूरं महान् राक्षसघोरभीषणं
जन्याजिरेऽमोघबलो विशङ्कटे
व्यापादयामास समीरनन्दन:

११७

नील: प्रहस्तं च महोदरं रणे
कुम्भं च सुग्रीवमहाबलोदधि
मैंन्दश्च यूपाक्षनिशाचरोद्भटं
स: शोणिताक्षं द्विविदोऽहिनद् बली

११८

वीरोऽङ्गदो दारुणदर्पकम्पनं
दुष्टं प्रजघाभिधराक्षसोत्कटं
घोरं महापार्श्वभटाभिमानिनं
शूराग्रगामी ऋषभो जिहिंस च

११९

य: कुम्भकर्णो विदितो महाबलो
बीभत्सकर्मातुलशक्तिभीषण
आसीत् करीवाकृतिदारुणो महान्
रामेण सोऽघानि रणे महोत्कटे



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१२०

तस्मिन् हते दुःखमगाधमाप्नुत
चक्रन्द खेदाच्च तदीयमानसं
मेने जयस्तत्र स रावणो रणे
विश्वप्रसिद्धोत्कटशौर्यसागरः

१२१

पक्षद्वये चापि सहस्रशो हता
स्ते लक्षशस्तत्र बभूवुराहता
ये जन्यभूम्यां भटवीरसैनिकाः
नाराचशस्त्रास्त्रधरा अवातरन्

१२२

सर्वास्तृता युद्धधरा विशङ्कटा
रुण्डैश्च मुण्डैः शतशः समन्ततो
घोषश्च भीमोऽति जहीममग्रतः
शत्रुं जहि त्वं पुरतश्च पुस्फुटे

१२३

आकाशभागः ककुभश्च मेदिनी
शस्त्रास्त्रवृन्दप्रभयावदातया
भूत्वोज्ज्वला वह्निविभाभृतोऽभवन्
शब्दश्च चण्डोऽतितरां श्रुतोऽभवत्

१२४

कोदण्डमुक्ता इषवो भुजङ्गमा
उड्डीयमाना इव वीक्षिता रणे
नानाशतघ्न्यो ह्यभवंश्च शक्तयो
भूयांसि शस्त्राणि गदाश्च भीषणाः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१२५

विख्यातवीर्यो जगतीन्द्रजिज्जयो
शस्त्रास्त्रसज्जां महतीमनीकिनी
मादाय युद्धाजिरसैन्यवेष्टिते
विध्वसयन् रामभटानवातरत्

१२६

तं वीक्ष्य सिंहोरुचलं हि लक्ष्मणः
गर्ज्य स्वचापं विदधच्च सायकान्
क्षिप्तान् प्रदीप्तान् रिपुसैन्यमर्दयन्
जन्यावनिं क्षिप्रमशोभयद् वशी

१२७

जाताः क्षणेनैव चमू बलीयसी
निशाचराणामभवच्च चूर्णिता
गर्जन् स चोद्दिश्य हि जिष्णुजित् पुर
श्चक्रे गतिं लक्ष्मणवीरसत्तमम्

१२८

जातं तयोरद्भुतभीषणं रणं
सम्प्रेक्षणीयं सुतरां द्वयोरपि
पक्षद्वयस्यापि चमू ददर्श तद्
उच्चैः स्वहर्षं दधती महारवम्

१२९

सौमित्रिवीरः कृतवान् रिपोर्बलं
क्षीणं नितान्तं स्वशरैर्निरन्तरं
शत्रोर्मदोऽग्लायत दर्पधारिणः
सर्वोऽवलेपश्च बभूव दुर्बलः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१३०

मूर्च्छां गतोऽसावथ नीयते स्म च
युद्धस्थलादागतचेतनस्ततो
यज्ञप्रवृत्तो झटिति प्रबाधितः
प्रायाच्च योद्धुं सह वायुसूनुना

१३१

कोपाकुलोऽसौ प्रयुयोज वक्षसि
शक्तिं स्वकीयामसुहारिणीं तदा
सौमित्रिवीरस्य कठोरराक्षसो
मूर्च्छामनैषीन्नितराममुञ्च सा

१३२

मूर्च्छां गतं तं हनुमान् निनाय च
रामस्य पार्श्वे प्रियबन्धुलक्ष्मणं
वीक्ष्याथ रामो गुरुधैर्यवानपि
दुःखादसीमात् प्ररुरोद मूर्च्छितम्

१३३

बन्धो! स्वकीयं सकलं सुखामितं
राज्यस्य पूज्यां जननीं विहाय च
भार्याञ्च बन्धू प्रियराजमन्दिरं
दुःखानि सोढुं सह चागतो मया

१३४

प्रेमप्रगाढं तव बन्धुलक्ष्मण!
केन प्रकारेण वदानि साम्प्रतं
माता पिता राज्यसुखं च वैभव
मासं तवाहं सकलं ममानुज!



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१३५

दुःखानि सोढुं विपिनं त्वमागतः
सार्धं मया कष्टबहूनि लक्ष्मण!
बाधा असह्याश्च नितान्तदुस्तरा
श्चिन्ता कृता कापि न मत्कृते त्वया।

१३६

चिन्ता मदीया सततं कृता त्वया
पेयं पयो भोज्यफलानि कानने
उद्दिश्य वस्तूनि सुखोचितान्यपि
वासानुकूला च कुटी विनिर्मिता

१३७

सुप्तः स्वयं नो निशि शायितस्त्वया
खिन्नं च जातं मम मानसं यदा
दूरीकृतोऽहं बहुसान्त्वनाप्रदैः
खेदात् स्ववाक्यैर्मयि चिन्तितेन हि

१३८

अम्बां तथा नो त्वममन्यथाः यथा
स्वां भ्रातृजायामनिशं गरीयसीं
प्राप्ता न सा स्याद् विपिनेऽपि भीषणे
कष्टं तथा त्वं यतत्से स्म सर्वदा

१३९

मां दुःखितं त्वं तु कदापि न क्षमो
द्रष्टुं हि कस्मान्न दुनोसि दुःखित
मुत्तिष्ठ शीघ्रं समरे स्थितोऽस्म्यहं
बन्धोः सहायः सुखदुःखयोरपि



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१४०

एषा विपच्चेद् विदिता भवेन्मम
नाज्ञा ितुश्चापि मयाभिपालिता
पत्नीवियोगोऽपि न तद्विधो मतो
बन्धोर्वियोगो हि यथा महान् मतः

१४१

रामस्य दुःखे सकलाश्च दुःखिताः
जातास्तदा ोचत तं विभीषणो
वैद्यः सुषेणो नगरे महान् भिषग
आनेय आश्वत्र स वायुसूनुना

१४२

श्रुत्वैव गत्वा च सुषेण आहृतः
आज्ञाभवत् तस्य हिमालयान्नगात्
सञ्जीवनी चाह्रियतां हि सत्वरं
पूर्वं निशान्तादिह जीवनामृतम्

१४३

वीरो हनूमान् गतवान् हिमालयं
सूर्योदयात् प्राग् हरति स्म तां तदा
संसेवितायां द्रुतमेव लक्ष्मणः
सत्यां च तस्यामुदतिष्ठत प्रियः

१४४

हर्षध्वनिस्तत्र कृतोऽभवन्महान्
रामश्च लेभे नवमेव जीवनम्
सौमित्रिबन्धुञ्च समीरनन्दनं
प्रीत्योरसा सः परिषस्वजे भृशम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१४५

सञ्जीवनीं पर्वतखण्डशोभिता
मादाय मार्गे भरतेन वीक्षितः
उड्डीयमानो ह्यहमन्यथा मतो
बाणेन सोऽतो मम पातनं व्यधात्

१४६

बक्त्रान्मदीयाच्छ्रुतवान् यदा च सः
रामो हि रामो निकटे ममागतः
विज्ञाय सर्वं मम चाननात् तदा
जातं तदीयं हृदयं व्यथाकुलम्

१४७

बाणस्त्वकीयेन स मामियेष च
धर्मप्रियः प्रेषयितुं परं मया
योगस्य शक्त्या शुचिसिद्धितेजसा
प्राप्तो भवेयं समये स ईरितः

१४८

स्वास्थ्यं प्रपन्ने हनुमानवोचत
रामं प्रसन्नं प्रियबन्धुलक्ष्मणे
वृत्तञ्च तद् राममनोऽनयद् भृशं
शान्ति च धैर्यं महतीञ्च सान्त्वनाम्

१४९

कृत्वा प्रतिज्ञामथ लक्ष्मणो गतः
जन्ये निहन्तुं रिपुशक्तिदारुणं
वीराग्रणीरिन्द्रजितं धनुर्धरो
रामं स्वबन्धुं विनयानतो नमन्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५०

जातं च युद्धं नितरां भयङ्करं
मध्ये तयोर्वीक्ष्य गता भयं भृशं
शूराः समग्रा रणमेदिनीस्थिता
जायेत किं ते प्रययुश्च चिन्तनाम्

१५१

हन्तुं तदा तं धनुषा सुशोभित
आरोपयामास शरारुसायकं
चापे स वीरप्रवरार्च्यलक्ष्मण
श्चिच्छेद शीर्षं तरसा ह्यरातेः

१५२

वीरर्षभस्येन्द्रजितोऽभवद् वधो
लङ्कापतेर्मानसदारणक्षमः
शिरः स्वकीयं स भुवि न्यपातयत्
हन्ति स्म शोकः स हि तं यथार्थतः

१५३

योद्धुं स्वयं सः प्रचचाल सत्वरं
प्रख्यातशौर्यो जगदेकमानभृद्
आज्ञापयामास च सैन्यदुस्तरम्
अस्त्रैश्च शस्त्रैः परिभूषितं भवत्

१५४

तूर्यस्वनैस्तत् प्रचलेत् प्रकम्पयद्
आशाः समग्रा गगनं च मेदिनीं
स्वान्ते च शत्रोर्विनिवेशयद् भयं
मृत्योश्च तस्य ध्वजिनीं विनाशयत्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५५

युद्धं प्रवृत्तं जगतीभयावहं
दृष्ट्वा तयोस्तद् हृदयं महादृढं
शूरोत्तमस्यापि च कम्पनं ययौ
वीरप्रसिद्धाः बहुविस्मयं ययुः

१५६

जेतास्मि रामस्य बभूव निश्चयः
स्यां रावणस्येति हतोऽपि संयुगे
तस्मात् स्वशौर्यं परिपूर्णतामयं
तौ दर्शयामासतुरत्र सर्वथा

१५७

छेत्तुं पताकां कृतवांश्च रावणो
यत्नाधिकं रामरथस्य राक्षसः
प्राप्नोन्न साफल्यमसौ निजेप्सिते
बाणस्तदीयो भवति स्म निष्फलः

१५८

क्रुद्धो भवन् सायकमक्षिपत् तदा
छेत्तुं ध्वजां स्यन्दनवर्तिनीं द्रुतं
रामोऽपि लङ्कापतिरावणस्य च
छित्त्वावनौ पातयति स्म तामसौ

१५९

अश्वांश्च रामस्य ततश्च रावणो
बाणैः प्रहर्तुं कृतवाननारतं
यत्नः परं तस्य बभूव सार्थको
नो कोपमाप्नोत् प्रचुरं हतोऽधमः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१६०

वृष्टि: शराणां मनुते स्म राघवो
ह्यर्वत्सु निन्द्यामत एव सायकान्
चिक्षेप नो न्यायदयास्थमानसः
सन्तो निरागःसु भवन्ति नाहिता:

१६१

माया: व्यधाद् राक्षसमायिरावणो
बह्वी: परं तत्र च निष्फलोऽभवत्
क्रोधः प्रचण्डः प्रयुयोज सायकान्
भीमान् विशाक्तानसुहारिणस्तदा

१६२

सर्वानिषून् बाणकठोरवृष्टिभी
रामो ह्यभांक्षीत् तरसा महाबलो
लङ्काधिराजस्य महान् धनुर्धरो
व्यर्था: कृतास्तस्य समस्तशक्तय:

१६३

जातौ वधार्थं बलिनौ समुद्यतौ
सूतौ तदीयौ निजचातुरीं तदा
सन्दर्शयन्तावपि वीक्षितौ भृशं
नानाविधे मण्डलवीथिकादिके

१६४

त्रासाधिकामर्षणरोमहर्षणं
भीमस्वनाधायकबाणदारुणं
जन्यं प्रचण्डं बहुलायुधोद्यतं
जातं प्रवृत्तं तुमुलं भटाकुलम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१६५

तौ युध्यमानौ समरे परस्परं
सम्पीडयन्तौ भृशमर्दने रतौ
शस्त्रास्त्रसञ्चालनदक्षतागतौ
संवीक्षितौ विस्मितमानसैर्भटैः

१६६

क्रोधान्महाबाहुसुधीरराघव
आशीविषाभं शरकर्कशं ततः
सन्धाय चापेन शिरोऽसुनाशकं
चिच्छेद लङ्कापतिरावणस्य सः

१६७

सर्वत्र लोके जयघोष उत्थित
आनन्दसान्द्रो विततोऽभवत् ततो
रामो जयी विश्वजयी स वर्धता
मित्येष नादः श्रुतिमार्गमागतः

१६८

दुःखीभवन भूरि तदा विभीषणो
विषण्णचित्तो विललाप रावणे
प्राप्तां गतिं तां परिवीक्ष्य शोकदां
श्रीरामवैरस्य फलं विचिन्तयन्

१६९

अन्तःपुरस्याखिलराक्षसीयुता
मन्दोदरी शोककदर्थिता भृशं
चक्रन्द शोकेन चिरं शुशोच सा
प्राप्तां गतिं तामघकर्मणां वशात्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१७०

अन्त्येष्टिसंस्कारनिमित्तमुक्तवान्
रामस्ततो बन्धुविभीषणप्रिय
माश्वासयंस्तं बहुधैर्यदायकैः
शान्तिप्रदैर्वाक्यगणैश्च बन्धुरैः

१७१

जन्ये हतो नो भवति स्म रावणो
भूत्वा विना पौरुषगीतमादृत
मुत्साहदीप्रं महतीं स्वशूरतां
प्रादीदृशच्चण्डबलं स संयुगे

१७२

भूत्वाऽभयोऽसौ निपपात संयुगे
क्षात्रं स्वधर्मं सततं जुगोप सः
ये युध्यमाना निहता भवन्ति ते
स्वर्गं लभन्ते च यशोऽविनश्वरम्

१७३

यः कर्मनिष्ठो न च नैजधर्मभृत्
शोकास्पदं सोऽवनिमण्डले नरो
जातस्य मृत्युर्ह्यसुधारिणो ध्रुवो
जन्मापि नूनं मृततां गतस्य च

१७४

सः शोचनीयो न कदापि भूतले
यस्यास्ति शौर्यं प्रथितं सदाभवत्
शूरेषु वंद्यं भुवि विश्रुतेषु च
तेजस्विनोऽपि प्रययुर्यतो भयम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१७५

आयोधने यो मनुजो हि युध्यते
प्राप्नोति शूरो विजयं न स: सदा
सञ्जायतेऽप्यत्र रणे पराजित
स्तस्मान्न शोच्य: कृतपौरुषोद्यम:

१७६

संलब्धधैर्योऽथ विभीषणस्तत
श्चान्त्यां क्रियां शास्त्रविधिं समाश्रयन्
राजोचितं गौरवमानपूर्वकं
चक्रे स्वबन्धो: सहबन्धुबान्धवै:

१७७

राम: स्वबन्धुं प्रियलक्ष्मणं तत:
प्रोवाच कर्तुं ह्यभिषिक्तमञ्जसा
भक्तर्षभञ्चापि विभीषणं प्रियं
गत्वा पुरीं वैभवबन्धुरप्रियाम्

१७८

सर्वत्र लङ्कानगरी व्यभूष्यत
सत्तोरणैर्मौक्तिकभूषणादिभि
स्तूर्यस्वनै: सर्वदिशो नभोऽपि च
शङ्खादिशब्दैर्गुरुभि: प्रपूरितम्

१७९

गीतानि नृत्यान्यभवंश्च मङ्गलम्
आनन्दकल्लोलमये शुभे क्षणे
सिंहासनासीनविभीषण: कृत:
प्रीत्याभिषिक्त: श्रुतिरीतिपूर्वकम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१८०

जातेऽभिषेके सति मातृजानकीं
रामाज्ञया वायुसुतोऽगमत् प्रियं
वक्तुं ह्यु दन्तं विजयश्रितं वर
सन्देशयुक्तप्रभुरामभाषितम्

१८१

आकर्ण्य वृत्तं मधुरं शुभं शिवं
सीता जगामातितरां प्रसन्नतां
दत्वा हि यत् त्वाम्प्रति तन्मनो मम
गच्छेत् सुखं वेद्मि न सा तमभ्यधात्

१८२

वाक्यं त्वदीयं सुरराजसम्पदो
ज्यायो महीयश्च गदन् हनूमान्
प्रह्वोऽनमत् तच्चरणौ पुनः पुनः
वीराग्रणी भक्तवरोऽनिलात्मजः

१८३

दण्ड्या हि ता यास्त्वयि नाचरन् प्रियं
श्रुत्वेति सीताभिदधौ पराश्रिताः
क्रूरा बभूवुर्मयि राक्षसाङ्गनाः
दण्ड्या न ताः वत्स समीरनन्दन

१८४

वीरो हनूमान् भणति स्म सादरं
मातः ! भवेत् कस्त्वमिवात्र भूतले
चित्तं दयार्द्रं निदधाति हीदृशं
शत्रोरपि स्त्रीषु वदान्यमानसे

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१८५

सीतां शिरः स्नातदुकूलशोभितां
जुष्टां च हेमाभरणैर्नवैर्नवै
रारोप्य दीप्तां शिविकां विभीषणो
रक्षःप्रसुप्तां द्रुतमाजहार च

१८६

कृत्वा परीक्षामनले च दीपिते
सीतापवित्राचरणस्य राघवो
हर्षेण तां स्वीकृतवांश्च सादरं
भक्त्या च नेमुः सकलाश्च जानकीम्

१८७

गन्तुं ह्ययोध्यां रघुनन्दनोऽवदत्
लङ्कापतिं भक्तवरं विभीषणं
गच्छामि सौम्याद्य सुशीलभूपते
स्वां राजधानीं भरतानुरोधतः

१८८

श्रुत्वेति रामस्य वचो विभीषण
आनर्च रामं प्रियबन्धुलक्ष्मणं
सेनापतीन् सैन्यगणं सुहृत्प्रियान्
प्रीत्या भृशं चाद्रियते स्म सम्पदा

१८९

रामो विमानोत्तमपुष्पके स्थितः
सीतां स्वबन्धुं परिगृह्य वातजं
सुग्रीवसौम्येन विभीषणेन च
सैन्येन सार्धं स्वपुरीमियाय च


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१६०

ईश्वर भारतं सुखमयं दयित सुखनिधे
विश्वपते हरे गुणमयं ललितगुणनिधे
आर्तदयामते बलमयं रुचिरबलनिधे
सन्ततमेव नाथ कुरुतां हितकर मम हे

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये रावणवधो नाम द्वादशः सर्गः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ त्रयोदशः सर्गः

१

रामं दयालुमनसं शरणं समेषा
मुद्धारकर्तृ परिपालकदीनबन्धुं
धर्मात्मसाधुसुजनर्षिमहर्षिवृन्द-
त्रातारमीड्यचरितं प्रणमामि भक्त्या

२

दिव्यं विमानवरपुष्पकसंज्ञकं तद्
व्योम्न्युत्पपात विदधत् प्रचुरं विरावं
श्रीरामचन्द्रहृतसंसृतिताप-सीता–
सौमित्रिबन्धुहनुमत्प्रभृतिप्रकृष्टम्

३

युद्धस्थलं हतबलोदधिरावणादि-
प्रख्यातवीरजगती विदितं हि सीतां
सन्दर्शयन् जलधिसेतुबलाढ्यशूर-
बालिप्रसिद्धनगरी-शबरीतपस्या-

४

स्थानाद्द्वितीयवनदण्डकचित्रकूट-
शैलादिदृश्यमथ पूज्यभराद्विशव्द-
द्वाजाख्यदर्शनकृतेऽवततार रामो
लब्ध्वा वरं मुनिवराच्च ततः प्रतस्थे


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५

सम्प्रेषितोऽनिलसुतो निकषा निषाद-
राजं गुहं च भरतं रघुनन्दनेन
ज्ञप्तिं निजागमननिष्ठमनःप्रमोद-
दात्रीं प्रदातुमृषिसज्जनरक्षकेण

६

रामं प्रणम्य मुदितः पवनात्मजोऽगात्
संसूच्य भक्तगुहराजमथ प्रधीन्द्र
आदर्शबन्धुभरतं नगरीमयोध्या
मावेदयत् सुखदमागमनं प्रभोश्च

७

श्रुत्वा प्रभोर्भरत आगमनं नितान्त-
प्रीतिप्रदायकशुभास्पदमञ्जसा तच्
चित्तप्रसन्नमुदितः पवनात्मजं सः
कर्तुं पुरस्कृतमजूघुषदीड्यवृत्तः

८

आज्ञापयद् भरतहर्षमनाः स्वभृत्यान्
सर्वां पुरीं नवनवैर्नितरामयोध्यां
मुक्तावलीलसितभूषणनव्यवस्त्रैः
संशोभयन्तु शुचितोरणवृन्दभव्यैः

९

सिञ्चन्तु शीतपयसा निखिलांश्च मार्गान्
गन्धप्रतानबहुभिः ककुभोऽम्बरं च
कुर्वन्तु सौरभमयं विविधैः प्रसूनैः
प्रत्यग्रचित्तसुखदैर्घनसारचूर्णैः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१०

गेहा भवन्तु सकला सितवर्णरम्याः
आभूषिताः प्रचुरसुन्दरकान्तिकान्ता
उच्चध्वजारुचिरमञ्जुलसर्वभागाः
रम्भाप्रवाललतितैश्च मनोज्ञरूपाः

११

बालाः किरन्तु सुमनोऽञ्चितपुण्यलाजान्
नक्तं भवेद् बहुलदीपकपंक्तिशुभ्रं
सर्वाणि राजभवनानि च मन्दिराणि
कार्यालयाश्च सकलाः परिभूषिताः स्युः

१२

अम्भोनभःस्थलचमूपतयः समग्राः
आयोधनार्हपटुसाधनवस्तुवृन्दं
सेनाश्च राष्ट्रपरिरक्षणकर्मलग्नाः
संरक्षिणोऽखिलपुरीपुरपत्तनानाम्

१३

सर्वाधिकारिसचिवादिकमन्त्रिवर्ग
श्छात्राश्च पण्डितपुरोहितवेददक्षाः
सङ्गीतनृत्यकुशला बहुतूर्यवन्त
आराधिताखिलकलानिपुणा बुधाश्च

१४

राज्ञ्यश्च राजभवनस्थितकर्मकाराः
न्यायाधिकारिगुरुसत्तमधीविशिष्टाः
विद्याविदग्धशुचिचित्रकलाप्रवीणाः
स्युः स्वागताय चलिता रघुनन्दनस्य



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१५

राष्ट्रं निधाय समुदं निजमूर्ध्नि चाज्ञां
प्रत्युद्गतं रघुपतिं प्रचचाल वक्तुं
जातं तदा तदखिलं नितरां प्रसन्न
मुल्लासमञ्जुलविभा विललास तत्र

१६

अश्वा: खुरैर्गजगणो निजबृंहितैश्च
नेमिस्वनैरपि रथा बहुलानकैश्च
शङ्खैश्च वाद्यनिवहैश्च नरा: पदाति:
चेलुस्तदाखिलजगत् परिपूरयन्त:

१७

तस्माद् विमानसुखदादवतार्य रामं
सुग्रीवलक्ष्मणविभीषणजानकीभि:
सार्धं प्रसन्नहृदय: करलग्नमालो
ह्यर्घ्यादिपाद्यनिवहै र्भरतो विनीत:

१८

आनर्च रामचरणौ नतमस्तक: सन्
पूर्णादरेण नृपवर्यविभीषणञ्च
सुग्रीवमान्यनृपतिं परिषस्वजे च
भक्त्या विनीतहृदयो नमति स्म सीताम्

१९

शत्रुघ्नबन्धुरथ पूजयतिस्म रामं
सीतामुदारहृदयां प्रियलक्ष्मणं च
प्रीत्या ततोऽखिलसमागतमानयोग्यं
सुग्रीववातजविभीषणसौम्यमीजे



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२०

एतत्तु कार्यमखिलं ह्यभिवन्दनाया:
जातं तदा रघुपति: स्वगुरु वसिष्ठं
पादारविन्दयुगलं स्पृशति स्म तस्य
मूर्ध्ना यदा च नमति स्म सबन्धुसीत:

२१

रामो विदेहतनयानुजलक्ष्मणश्च
मातृस्तत: प्रणतमौलिसुशीलसौम्या:
आनर्चु रीड्यचरणा बहुमानभक्त्या
तासां शुभाशिषमलप्सत ते तदानीम्

२२

रामस्तत: स्वसचिवान् निजमन्त्रिवर्गम्
अन्यांश्च मान्यसुजनान् नगरस्थवंद्यान्
सेनापतीन् गुरुकुलस्थितकोविदांश्च
न्यायाधिकारिनिखिलांश्च नमश्चकार

२३

रामस्तत: स्वभवनं प्रिय कान्तिकान्तं
नानाविधैश्च मणिभिर्बहुमूल्यरत्नै:
संशोभितं रुचिरभूषणभूषितं च
प्रांशुध्वजं विविधतूर्यरवेष्वयासीत्

२४

विश्रम्य राजभवने सुखपूर्वकं स:
सार्धं समागतमहोशविभीषणाद्यै:
पेयादिकं मधुरभोज्यपदार्थजातं
भुक्त्वा सबन्धुनिवहो भवति स्म हृष्ट:



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

रामोऽनुजैः सह रवावुदिते च शीघ्रं
क्षौरादिकार्यविनिवृत्तिमवाप्य रीत्या
स्नानं विधाय वसनानि च भूषणानि
वस्ते स्म शम्भुमनमच्च सभामियाय

२६

पूज्यं वसिष्ठमभिवाद्य सबन्धुराम
आस्ते स्म चासननिजेऽथ च मेदिनीशाः
अध्यासते स्म निजमासनमागताश्च
सर्वे च मन्त्रिसचिवा अभवन् निषण्णाः

२७

जाते स्थिते सकलसज्जनमण्डलेऽपि
पौरप्रधानजनताप्रियविज्ञमान्यो
मालां गले रघुपतेर्बुध आर्पयच्च
मध्ये ध्वनेः प्रभुवरो जयतादिति द्राक्

२८

हे नाथ वीरवर मौलिमणेऽभिराम
राम प्रभो रघुपते शरणं वयं त्वां
यामो महर्षिमुनिसज्जनसाधुरक्षिण्
कालुष्यलिप्तजननाशनदक्षबाहो

२९

धर्मोदयस्थितमनाः शुभमार्गदर्शी
न्यायप्रियः प्रियबुधप्रतिभावदातः
संसारपालनमतिः श्रुतिशास्त्रगामी
दौर्जन्यशाठ्यकपटच्छलकाष्ठवह्निः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३०

आचार सेवनरतश्च गुणानुरागः
शीलोज्ज्वलप्रथितशौर्ययशोऽभिवद्यो
विद्यानवद्यजनसेवितपादपद्मः
स्वाराध्यमातृपितृवाक्परिरक्षणस्थः

३१

रामो भवान् प्रकृतिसौम्यशुचिः समस्त–
तेजोऽभिभाविमहनीयमहत्त्वतेजाः
लोकस्तुत ललितकीर्तिजुषं भवन्तं
त्रिद्मो न केन विधिना ह्युपवीणयामः

३२

यज्ञादिलोकहितकर्मसुपोषकोऽस्ति
तस्माद भवांश्च तदरातिकुलं जिहिंस
भङ्क्त्वा धनुस्त्रिनयनस्य विदेहराज-
चिन्तां जहार च पपार तदीयकाङ्क्षाम्

३३

कर्तुं मनः सुमुदितं भरतस्य मातुः
प्रीत्या भवांश्च विपिने वसतिं चकार
विध्वंस्य राक्षसगणं कृतवान् ऋषीणां
सेवां नितान्तमहनीयहितैकलग्नाम्

३४

आगोविहीनहितबुद्धिकनिष्ठबन्धोः
पत्नीं बलाच्च हरति स्म बलाभिमानी
भ्रातापि यस्तमहिनद् भवदीयवाणो
ज्येष्ठ भवान् जगति पाति हि धर्ममार्गम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



३५

मैत्रीं भवानतितरां सततं ह्यगौप्सीन्
मित्रस्य कार्यमकरोन्मनसा भवांश्च
रक्षा व्यधायि भवता शरणागतस्य
नो दर्शितः क्वचिदपि प्रभुतावलेपः

३६

कर्माणि यस्य जगतीं नितरामतौत्सुः
सत्कर्मयोजितमतीनपि यश्चकर्त
दुःखेषु चापि भुवि पातयति स्म साधून्
तं दर्पपूर्णबलिनं च भवान् जघान

३७

इत्थं समस्तजनतातुलपूर्णभक्त्या
रामं प्रभुं स्वहृदयाभिमतं शरण्यं
प्रीत्याभिनन्दितवती परमाभिरामं
प्रह्वप्रसन्न विनताप्रियभद्रभावा

३८

उत्थाय तत्र च ततो भरतो जगाद
रामस्य राज्यमिदमस्ति मया तदाज्ञा-
हेतोः समस्तजनता सकलश्च देशो
ऽरक्ष्यन्त तस्य नृपतेरनुगानुगेन

३९

सौभाग्यपूर्णमिदमस्ति दिनं पवित्रं
तस्मै मया प्रणतमस्तकभक्तिभाजा
भ्रात्रेऽभिवंद्यचरणाय समर्प्यतेऽद्य
श्वः स्याच्च मङ्गलमयी ह्यभिषेकवेला॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



४०

सर्वे जनाः स्वसदनानि विभूषयन्तु
कुर्वन्तु मङ्गलमयानि सहर्षचित्ताः
सोत्साहकार्यसकलानि महोत्सवस्य
भव्यो भवेच्च शुभकान्तिमयः स्वदेशः

४१

राज्याभिषेकपरकञ्च पदार्थजातं
तीर्थोदकादिरसभेषजहेमकुम्भ-
माल्यादिगन्धकुसुमाक्षतलाजपत्र-
सम्भारसर्वतिलकोचितमाहरन्तु

४२

योग्यानुगाः सुमतयः कुशलाः पुमांसः
कार्येऽत्र मङ्गलमये द्रुतमेव लग्नाः
सम्पादयन्तु बहुचारुविदग्धरीत्या
स्यान्मण्डपस्य ललितैव विचित्रशोभा

४३

आदिश्य सा च परिषद् भरतेन नीता
क्षिप्रं हि संवरणमीड्यवसिष्ठरामौ
प्रस्थाप्य राजभवनं त्वभिषेककार्यं
संवीक्षितुं सपदि बन्धुयुगं न्ययुङ्क्त

४४

शङ्खादिदुन्दुभिरवेषु विभिन्नतूर्य-
शब्देषु रत्नमणिभूषितहेमपीठे
रामो व्यराजत समं जनकस्य पुत्र्या
वेदध्वनिप्रवणनृत्यकलाप्रवृत्तौ



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



४५

सम्पूज्य कुञ्जरमुखं ग्रहदेववृन्दं
तीर्थोदकादिरसभेषजपूर्णकुम्भं
जतिऽभिषेकरुचिरेऽक्षतकुङ्कुमेन
मौलिः कृतः सुरभिकेसरगन्धयुक्तः

४६

सार्धं बलिष्ठगुरुणा श्रुतिविज्ञमुख्यैः
ऋत्विग्भिरार्यचरितैरभिषिक्तरामोऽ-
कार्यम्बरातिरुचिरैर्मणिभूषणैश्च
रत्नोत्तमेन मुकुटेन च संस्कृतोऽसौ

४७

संगुञ्जिते श्रुतिविदां ध्वनिनोच्छ्रितेन
छत्राभिभूषितकरा निजबन्धुरामं
सेवाम्प्रति स्वहृदयेन च दत्तवन्तः
पुण्याभिषेकसमये ह्यनुजास्त्रयोऽपि

४८

सुग्रीववायुतनयौ च विभीषणोऽपि
भक्त्या प्रसन्नहृदया निजमिष्टदेवं
संसेविरे प्रियमनोरममान्यवंद्य-
पुण्याभिषेकसमये सुतरां नमन्तः

४९

रामः प्रभुर्विजयतां जयतान्नृपेन्द्रः
सूर्योद्भुतो रिपुतमोदलने समर्थः
इक्ष्वाकुवंशकुमुदप्रियचन्द्रचारुः
संवर्धतां रघुपतिर्जगतीशरण्यः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५०

शब्दो महान् वियति सर्वदिशासु चैव
व्याप्तोऽभवत् सुखकरो हृदयाभिरामो
राष्ट्रं तदा च नितरां भवति स्म दिव्यो–
ल्लासप्रसादरुचिरं सुषमाद्वितीयम्

५१

रामं स्ववत्सचरणाम्बुजपद्मनेत्र–
वक्त्रारविन्दमवलोक्य मुदं भजन्त्य
आशीर्वचोऽमृतघटैरभिषिक्तवत्य
स्तिस्रोऽपि वत्सलहृदातितरां जनन्यः

५२

तिसृततश्च चरणौ बहुभक्तियुक्ताः
रामस्य ता जनकजाचरणारविन्दे
प्रीत्या प्रणेमुरधिकप्रियतामनोज्ञाः
ज्येष्ठस्य चाप्यनुजपत्न्य उदारचित्ताः

५३

वेदाध्वदर्शकनिशाचररक्षितर्षि
माचारधर्मनयपालनलीनबुद्धि
विद्वन्मनस्विकुलगौरववृद्धिचित्त
माशास्महे न्यगदिषुर्मुनयश्च रामम्

५४

आजानुबाहुधृतचापशरं वसानं
पीतं पटं कमलनेत्रमनन्तशौर्यं
सौम्यात्युदारमनसं चरितावदातं
सीतापतिं नमति वायुज इत्युवाच



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

संसाररक्षकमनाथदरिद्रबन्धुं
भक्तार्तिनाशनपटुं शरणागतस्य
त्रातारमीड्यचरितं रघुवंशनाथं
सुग्रीव इत्यवदिलेन्द्रमहं नमामि

५६

रामावधेशबलसागरभग्नशैव-
चापं महाभुजविनाशितपापकर्मा-
सक्तं निवारितकुमार्गजनं जगाद
न्यायातुरागमिति नौमि विभीषणोऽहम्

५७

वन्दामहे जगति कल्पतरुं जनानां
राजेन्द्रराममनघं वयमङ्गदाद्याः
अन्यायपिष्टजनतोद्धरणार्हवीर्य
मूचुस्तदेति च चमूपतयः ससैन्याः

५८

साधारणेष्वपि दधाति जनेष्वजस्र
मात्मीयताधियमहो वसुधानृपेन्द्रः
चित्तं दयालुममितं न्यगदन्नुदारं
रामं नमाम इति चोच्चपदाः प्रधीशाः

५९

पौरा विनीतनतमौलिकृतज्ञचित्ताः
राजन् भवाननुपमोऽस्ति सुयोग्यशास्ता
तस्मात् पतत्रिपशवो भवति स्वतां स्वां
पुष्णन्ति तं च दधतेऽप्यगदन्नमन्तः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६०

मन्त्र्यादिसर्वसचिवाः अधिकारिणोऽपि
न्यायस्थिताश्च पृतनापतयश्च सर्वे
आरक्षिणोऽधिपतयो नगरस्थसंस्थाः
राजन् नुमो निजगदुस्तमिति प्रहृष्टाः

६१

सङ्गीतनृत्यकुशलाः श्रमिशिल्पिनश्च
चित्रप्रवीणकविवर्यकलानदीष्णाः
विज्ञानिशिक्षकजना इतरे च सर्वे
वन्दामहे कथितवन्त इति प्रसन्नाः

६२

रामाय सादरमथ क्षितिपा धनाढ्याः
प्रेम्णोपदां सविनयं प्रददुर्नमन्त
श्चान्येऽपि नागरजनाः प्रणता भवन्तः
प्रीत्या ददुश्च बुधवृन्दमुपायनानि

६३

मान्याधिकार पदशोभितमन्त्रिवर्ग
उच्चासनस्थितजनाः सचिवादिकाश्च
राज्यस्य चान्यसुजनाः प्रवराः सुधीन्द्राः
रामाय हर्षहृदया उपदां ददुश्च

६४

दत्वोपदा अनुपमा महती महर्घाः
रामाभिषेकसमये ऋषयः सुधीन्द्राः
भूपादिकाश्च सुहृदश्च विभीषणाद्याः
आर्चन् सभक्तिविनयेन च पूज्यसीताम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६५

राम: स्वयं नृपविभीषणमित्रवर्य-
सुग्रीवभूमिरमणौ प्रति सादरं च
नानाविधानि मणिरत्नविभूषणानि
ह्यन्यच्च वस्तुनिचयं प्रददौ सहर्षम्

६६

सीता स्वयं हनुमते प्रददौ महर्घं
हारं नितान्तधवलं विधुकान्तितुल्य
रामो विलोक्य धृतहार समीरसूनुं
सीतां सहर्षहृदय: परिवीक्षते स्म

६७

लङ्कारणस्य सकलान् सुभटान् बलौघान्
सेनापतींश्च पृतना गतसैनिकांश्च
नीलं नलं शतबलिं प्रियजाम्बवन्तं
वीराङ्गदादिनिखिलान् बलवीर्यसिन्धून्

६८

रामो नितान्तमुदितो नतमस्तक: सन्
युष्मद् ऋणान्न भविता स्मि कदापि मुक्त:
चैतद् भणन्निति च सत्कृतवान् समस्तान्
नानाविधैर्वसनभूषणरत्नदिव्यै:

६९

तत्रस्थितांश्च सुजनान् मुनिपूज्यविज्ञान्
मन्त्र्यादिकान् नगरराष्ट्र कलाविदग्धान्
विद्वत्कुलं श्रमिजनांश्च तपस्विनोऽपि
प्रीत्या धनाढ्यनिवहान् कृतवान् कृतार्थान्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



७०

व्यापारिणो विविधसभ्यसमाजमान्यान्
क्षत्रांश्च वैश्यनिकरं प्रियशूद्रवृन्दं
रामस्तदा सुकृतिनो मतसेविनश्च
प्रीत्यादरेण विदधौ नितरां च धन्यान्

७१

धेनूः प्रदाय विविधानि च भूषणानि
वस्त्राणि चापि वहुलानि धनं प्रभूतं
आर्चीन्महीसुरजनान् विनयान्वितः सन्
रामश्च याजकजनान् विभवैः कृतार्थान्

७२

रामाभिषेकमधिकृत्य हि राजकीयो
जातो महान् विविधभोज्यपदार्थभोजो
राष्ट्रं समग्रमभवत् प्रियतादराभ्याम्
आमन्त्रितं सुरसुदुर्लभवस्तुजातम्

७३

रामस्य चित्तमपि मित्रविभीषणादेः
प्रस्थानमानयत दुःखकठोरघोरं
सर्वेऽपि ते च सुहृदोऽथ समस्तवीराः
रामं विहाय गमनं न कदापि चैच्छन्

७४

आयात सव दिवसो नियतेः प्रभावात्
तस्मात् प्रभू रघुपतिः सुहृदः प्रियान् स्वान्
आहूय सादरमभाषत तांश्च सर्वान्
मुक्तः कदापि न भवेयमृणादहं वः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



७५

आपत्सु सर्वसुहृदो नितरामभूवन्
साहाय्यदाः उपकृतः सकलैर्भवद्भिः
पश्यामि तन्न सविधे मम बन्धुवर्याः
स्याद् यत्प्रदाय हृदयञ्च लभेत शान्तिम्

७६

यांतु स्वसद्म सुहृदो निवसन्तु तत्र
प्रेम्णा भृशं विदधतः सहयोगमेयं
भूयाद् यशो विपुलवैभवभव्ययुक्तं
सञ्जीवनं परमशान्तिमयञ्च दिव्यम्

७७

सुग्रीववायुतनयौ च विभीषणश्च
श्रुत्वाङ्गदोऽथ नलकेसरिजाम्बवन्तः
सर्वे बभूवुरतिदुःखितमानसाश्च
रामस्य मंगलमयस्य गिरां तदा ताम्

७८

अश्रूणि सद्बलभृतः शुभबुद्धिचित्ताः
संरुद्धकण्ठमलिनाननदुःखभाजो
गच्छेम केन विधिना मुमुचुर्भवन्तं
हित्वा स्वनाथमिति ते शरणं वदन्तः

७९

आश्वासनं बहुविधं प्रचुरं नितान्तं
वात्सल्यपूर्णहृदयेन च तान् समस्तान्
स्नेहेन चापि मधुरैर्वचनैश्च रामो
दत्ते स्म तान्प्रति धृतिं सरसप्रबोधाम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


८०

चित्तं व्यथामतितरामगमच्च तेषां
ते सर्वं एव विपुलां गहनामसह्यां
पीडां श्रिताः स्वसदनानि तदा कथञ्चिद्
जग्मुर्विहाय पवनस्य सुतं तदानीम्

८१

रामं श्रयंश्च विदधच्च तदेति सेवां
सोऽनेहसं गमयितुं निदधाति तस्य
काङ्क्षामतः स समये समये वयस्यान्
द्रष्टुं ह्युपैश्यति धृतिं प्रददज्जगाद

८२

अस्माकं देशे नवतरुणाः कर्त्तव्यस्थाः
कुर्वन्तो रामं शुचि चरितं नैजं लक्ष्यं
साधूनां सेवां जगदखिले कुर्वाणास्ते
एतं देहं स्वं भृशसफलं कुर्युः सर्वे

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये रामाभिषेको नाम
त्रयोदशः सर्गः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# अथ चतुर्दशः सर्गः

१

भजेऽहं श्रीरामं धवलचरितं साधुहृदयम्
ऋषीणां सेवायां बुधवरजनानां च नितरां
दधानं स्वं चित्तं दुरितदलने चापि सततं
प्रजानां रक्षायां सुकृतधृतबुद्धिं सविनयम्

२

प्रभातं दिव्याभं पवनसुखदं पूतककुभं
प्रकाशश्रीवंद्यं विहगरवपेयं शुचितमं
हसत्पुष्पोद्यानं विमलतटिनीनीररुचिरं
भ्रमद्गुञ्जद्भृङ्गं सुरभिललितं व्योमविमलम्

३

विलोक्य श्रीरामो मुदितहृदयोऽभूदतितरां
क्वचित् तस्मिन् काले मनुजनिवहं स्वच्छपवने
भ्रमन्तं सोऽपश्यत् क्वचिदपि च सश्छात्रनिकरं
पठन्तं चाश्रौषीत् क्वचिदपि च वेदध्वनिशुभम्

४

क्वचिद् देवागारे क्वणनमधुरं श्रोत्ररुचिरं
क्वचित् पुण्यक्षेत्रे भजनरतपुण्यात्ममनुजं
क्वचिन् नद्यानीरं प्रचुरपुरुषस्नातसुभगं
क्वचिद् गायन्तीं सः प्रियमधुरगीतीश्च वनिताम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


५

स मङ्गल्यः कालः परमविशदः सन् समुदितो
वरोत्साहं चित्ते नृषु स जनयन् स्फूर्तिसरसम्
अथालस्यारातौ परुषमर्शनिं चापि निदधत्
प्रियोद्बोधं वर्षन् निखिलभुवने स्व च शुशुभे

६

निवृत्तो भूत्वासौ कृतनियतकर्मा रघुपतिः
प्रवृत्तः सोत्साहः कतिपयविधानात्मकनवे
प्रिय कार्ये स्तुत्ये मुदितमनसा स्वानुजयुतः
स ऐच्छद् राज्यं तत् सुखधनमयं स्याद् गतिपरम्

७

प्रजा स्यादर्थाढ्या विविधगतयः स्युश्च सुखदा
भवेद् ज्ञानश्रीभूषितनिखिललोको हततमाः
जनाः शिष्टा नम्रा प्रियगुरुजनाज्ञाः शुचिहृदो
हरौ भक्तिस्तेषां भवतु हृदये प्रौढनिविडा

८

भवेद् विद्याराध्या तपसि यशसि प्रीतिरनिशं
जनानां दृष्टा स्याज्जगति न च रागो हितकरः
सदा श्रेयोहेतोर्मनसि रुचिगाढ़ा समुदियात्
प्रजासूद्योगाः स्युर्विविधबहुला वैभवकराः

९

भवेन्नो स्वाच्छन्द्यं गुणविविधलाभे गुरुरुचिः
मनः स्वातन्त्र्यस्थं विमलतमकर्त्तव्यपरकं
सदा भद्रं भद्रं चरतु तदजस्रं नृनिवहे
न चौर्यं नो हिंसा न च भुवि दुराचारदुरितम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१०

जनाः प्रीत्या सर्वे जगति वसतिं कुर्युरनिशं
विधेया नो वृत्तिः परुषहृदया प्राणिषु भवे
सदाऽसत्यं लोभो गुरुतमरिपू जीवनभृतां
विमृश्यैतत् सर्वं चलतु जनता धार्मिकपथे

११

अनीकिन्यां सर्वे प्रचुरबलवृद्ध्यै स्ववसरं
लभन्तां, स्युर्वैद्या विपुलतरसत्साधनभृतः
भवेयुः शिक्षायामभिमतसमीचीन उदयो
विभागाः स्युः पूर्णा गुणसमुचिता अर्थबहुलाः

१२

इदं सर्वं रामः सदसि सचिवानामभिदधौ
तदा मन्त्रिस्तोमो ह्यनुजसमवायोऽथ सुजनाः
पदासीनाः पौरा अपि च बहवस्तत्र सुधियो
व्यराजन्त श्रोतुं तदभिहितनिर्देशमखिलम्

१३

विभागा नः सर्वे समुचिततयादेशमखिलं
द्रुतं कुर्युः कार्ये परिणतमिमं भूहितकरं
निगद्यैतद् रामः सपदि कृतवांस्तद् गुरुसदो
विसृष्टं तत्काले जनहितमना लोकशरणम्

१४

स्नुषाः साम्बाश्चेतो वनगमनहेतोः रघुपतेः
समं याता तेन प्रियचरितसीता शुचिमतिः
अतः सर्वायोध्या नृपतिभवनं राष्ट्रमखिलं
भृशं चासीत् सर्वं व्यथितहृदयं चापि मलिनम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१५

न चासीत् सौमित्रिः प्रियमधुरचित्तातिसरला
ह्यतः कान्ता तस्य प्रतिदिनमभूत् क्लान्तहृदया
वियोगाग्निश्चण्डोऽदहदतितरां तां सुमृदुलाम्
अनैषीद् ध्यायन्ती समयमखिलं शङ्करमसौ

१६

कदाऽऽगच्छेद् भर्ता व्रतधृतमतिः प्राणदयितः
कदाऽऽगच्छेद् सीता सदयभागियी मेपतिगतेः
कदाऽऽगच्छेद् रामो रघुकूलमणिः सौम्यसरलः
सदैतच्चिन्तायां विमलहृदयाभून्निपतिता

१७

न सा सुभ्रू हृष्टा मनसि न हसन्ती मृदुवपुः
अवाप्ता केनापि प्रकृतिसरसा पद्मनयना
जपन्ती ध्यायन्ती हिमगिरिसुतां शम्भुदयितां
कृशाङ्गी सन्तप्ता गुणगणवती चन्द्रवदना

१८

स्नुषा सौम्यस्वान्ता प्रियशुभमतिः पुण्यचरिता
प्रिया धर्मारूढा भरतदयिता गात्रमृदुला
यथा भर्ता लीनस्तपसि कठिने साधुहृदया
स्मरन्ती शम्भुं सा रहसि च तथाकालमनयत्

१९

सुखं सर्वं त्यक्त्वा विभव सकलस्यापि विनता–
निशं साप्युत्कृष्टप्रथितभरतस्य प्रियतमा
न भोगं कृत्वा श्रीच्छविरतिभृतस्तापस इव
न्यधाद् वृत्तिं धर्म्यां सदनविपिना जीवनशुभाम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



२०

स्वबन्धोर्लग्नत्वात् तपसि सकलं राज्यमनिशं
कनिष्ठः शत्रुघ्नोऽनुजशुचमतिर्धीरहृदयो
ददर्श प्रेक्षावानवहितहृदा शूरविदितः
परं सम्पद्भोगं रुचिरचरितो नैव विदधौ

२१

स्नुषा शत्रुघ्नस्य प्रियतमपदाम्भोजहृदया
ह्यजस्रं चात्मानं व्रतनियमयोर्योजितवती
न चापि स्वप्ने सा सुखमनुपमं राज्यपरकम्
अतश्चित्तं निन्ये नृपतिकुलजाता सुचरिता

२२

सदा सा धीशुभ्रा गुरुजनपदाराधनमति
मृगाक्षी सद्भावप्रचुरगुणराशिः पतिरता
ह्यरण्ये सीताया रघुकुलपतेर्लक्ष्मणशुचेः
स्थितत्वात् तन्वी चामुदितहृदया वासमकरोत्

२३

दयालूमाभर्तुः परमकृपया साम्प्रतमयं
प्रमोदानां कालो नृपतिसदनं प्रीतिवसतिं
व्यधात् तस्माद् वध्वोऽनवधिमधुरोल्लासहृदया
हसन्त्यो गायन्त्यो नयनपथगास्तत्र विबभुः

२४

पुनः सर्वा अम्बाः प्रियनिजवधूर्वीक्ष्य सुखिताः
प्रसादं चानन्दं सुखमतिशयं ता अधिययुः
समस्तैः शृङ्गारैः परिलसितदेहा सुललिताः
प्रियोदन्ते लग्ना हृदि बहुमुदञ्चाप्यजनयन्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


२५

सम जानक्या ता अनुजदयिता: काननपरा:
व्यधुर्वार्तास्तास्ता मृदुलहृदया राजतनया:
अगुर्भीतिं त्रासं भृशचकिततां चापि सकला:
अभूवस्ता वार्ता अनुपमविचित्रा: प्रतिवधू:

२६

तपोऽरण्यं सीता मुनिजननिवासस्थलमथ
सरिच्छैलान् भीमान् विपिनगहनं राक्षसगणं
मनोहृद्यं दृश्यं वहुभयदरीमन्यविविधा—
श्रमाणां सौन्दर्यं परमसुखदं वर्णितवती

२७

तदा लङ्काचर्यामपि च विदधौ मारुतिकथां
रणं लङ्कायास्तद् हतरिपुगणं वर्णितवती
निशम्यैतत् सर्वं विविधबहुभावोद्भवनवम्
अवापुस्ता वध्व: सुखमपि च दु:खं बहुविधम्

२८

विनोदं कुर्वन्त्यो ललितसरसं चित्तसुखदं
भृशं नृत्यन्त्यस्ता विविधरुचिकार्येषु निरता:
प्रिया गाथा नव्या: अथ च विविधास्ता अचकथन्
चिरं प्राप्ते काले कुसुममृदुला भ्रातृदयिता:

२९

प्रभाते ता वध्वो जनकतनयायाश्चरणयो
र्नमस्कारं चक्रु: प्रणतनिटिला: प्रीतहृदया:
तदीयां सेवां ता: अनुदिनमकार्षु: सविनयं
कृतार्था धन्या: स्वा मनसि विविदुर्बन्धुदयिता:


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


३०

भृशं सीतारामावनुजदयितानां सविनयां
कृता सेवा भक्त्या व्यधितसुखितौ प्रीतहृदयौ
तयोः प्रीतिः सान्द्रा ह्यनुजदयितासुप्रतिदिनं
गता वृद्धिं चाशीर्वचनततयस्तासु ववृषुः

३१

त्रयस्ते शुश्रूषां व्यधुरनुदिनं श्रीरघुपतेः
स्वबन्धोर्भक्त्या वै प्रणतनिटिला वंद्यचरिताः
प्रजाशास्तुर्नम्रा अनिशमनुजाः पुण्यहृदयाः
सदा तत्सेवायां स्वमनुजजनुर्धन्य मविदुः

३२

न्यषेवन्त स्वाम्बाः प्रणतशिरसा सादरधिया
सुता वध्वः सर्वा अपि च सकला भक्तिविधिना
विनालस्यं प्रीत्या गुरुतरेमुदोत्साहरुचिराः
स्थितासु श्रेष्ठानामनुचरजनानामवलिषु

३३

रजन्यामेकस्यां सुखदमवदातं च शशिनं
किरन्तं ज्योत्स्नां स्वां जगति निखिले स्वच्छशिशिरां
नितान्ताह्लादानां ततिमतिशयां मोदमधिकम्
अवेक्ष्यानन्दानां निधिमगमदीशो रघुपतिः

३४

अयं पुण्यात्मा ना न च परमयं तादृशजनो
विचिन्त्यं तन्नोऽयं दिशि दिशि शशी चित्तसुखदां
मनोज्ञां स्वां ज्योत्स्नां विमलसलिले कच्चरजले
विषे पीयूषेऽपि प्रथितकरुणो वर्षति भृशम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



३५

अयं चन्द्रोदारः किरणनिचयैः पावनशुभैः
सुधावृष्टिं कृत्वा जगति सकलं भेषजगणं
प्रदत्ते प्राणौजः प्रति भवति कल्याणजनकः
कृतेऽयं जीवानामुपकृतिपरो धन्यशशभृत्

३६

परिप्रीणात्येषः प्रियकुमुदिनीस्ताः सुहसितः
करोति स्वांश्वग्रै रमृतधरचन्द्रः प्रियतमः
समुद्रं कल्लोलैस्तरलबहुलैः प्रीतमनसं
चकोरान् सानन्दान् जननयनचित्ते च मुदिते

३७

द्विजत्वाच्चन्द्रोऽयं भुवि च कुरुते धर्ममनिशं
स्वकीयैरेकैकैः किरणरुचिरैः शीतविमलैः
सुराणां तृप्त्यर्थं सदयहृदयो यच्छति सुधाम्
अमायां तेभ्यः स्वं ह्युपकृतिपरो विग्रहमपि

३८

तदेवं चन्द्रं सः परमुदितोऽस्तौद् रघुपतिः
जनाः शिक्षां चन्द्रादवनिभुवने ह्याददतु च
यथा सः पुण्यात्मा भवतु च तथा सर्वजनता
नृपस्यैच्छत् तस्य प्रतिजनशुभाकाङ्क्षि हृदिदम्

३९

कदापि श्रीरातं सुमतिभरतस्तं सविनयम्
अपृच्छद् यद् बन्धो कथमयमगादत्र पुरुष
स्त्रुटिं चेमामात्मा ननु वपुरिदं वक्तु भगवं-
स्तदावादीद्रामो मुदितहृदयः स्वीयमनुजम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



४०

जडा अर्था सर्वे विगतनिजभोगा अधिगताः
न तेषां स्वार्थोऽल्पोऽपि च भवति भुक्ता इतरयें-
कया शक्त्या आत्मा पुरुष इति वा सिद्ध्यति ततः
प्रमादान्नो ध्याद्धं तदियमभवत् सङ्कटकरी

४१

जगद् भोग्यं सर्वं भवति तदिदं भोक्तृ न च तत
प्रयोक्ता वा भोक्ता स्ति तदितर उक्तः स पुरुषो
विवेकाभावाद् हा स्ववपुरिदमात्मेत्यवगतम्
अयं देहो यानं भवति न च सूतः स्वयमपि

४२

इयं मुक्तेरिच्छा सपदि कुरुते नः स्फुटतया
सुविज्ञातानात्मा हृदयमतिदेहेन्द्रियपरो
गुणेभ्यो भिन्नोऽसौ प्रकृतिविकृती नो स्पृशति सः
इदं चोक्त्वा तूष्णीं रघूकुलमणिः क्षिप्रमभवत्

४३

अथोद्दिश्यात्मानं वदतु भगवन् किं निगदितं
जगत्कल्याणार्थं परमहितवेदान्तनिगमे
इदं नम्रोऽपृच्छद् रघुपतिमथो लक्ष्मण इति
कृते ज्ञानोद्दामोत्तमविमलमेधाधरनृणाम्

४४

न चेशाद् भिन्नोऽसौ य इति कथितो जीव इह च
न जीवाद् ब्रह्मेदं कथमपि च भिन्नं निगदितं
तदेकं ब्रह्मैव श्रुतिषु बहुधा गीतमधिकं
जगन् मिथ्या सत्यं त्रिगुणरहित ब्रह्मविदितम्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


४५

असूयं तन्नित्यं विकृतिरहितं कालगगन—
दिशाभेदाच्छेद्यं हृदयवचनातीतमहिम
स्वमायाहेतोस्तद् विलसति च नामाकृति मटन
मतं सच्चित्रत्तद् वै निरवधिकमानन्दमतुलम्

४६

अवोचच्छत्रुघ्नः प्रकृतिसरलं वन्धुसदयं
कथ ज्ञानं श्रेष्ठं न च तदिव किञ्चिद् गुरुतमं
पवित्रं तज्ज्योतिर्मतमखिलशास्त्रेष्वतिशयं
प्रिय रम्यं प्राप्यं स्फुटमिह मतं स्वं विकिरतु

४७

इदं नूनं ज्ञान हरति धिषणाया मलिनतां
निरस्तं सर्वेषां झटिति कुरुते संशयतमः
इवादित्यो लोके मनुजहृदि चेदं जनयति
प्रकाशं श्रेयस्कृद् भवति मतमेतद् गुरुतमम्

४८

विना ज्ञानं कर्म प्रभवति न दातुं किमपि च
हिताल्लब्धो ज्ञानात् क्रतुजनितनाकोऽपि भवति
मनुष्यो निष्कामो भवति विमलज्ञानकृपया
प्रदत्ते यत् कर्म क्षयमयमथानित्यमपि तत्

४९

इदं पुण्यं ज्ञानं हितकरपथं दर्शयति च
इदं सत्यं ज्ञानं जनयति सुखं नित्यमपि च
इदं शान्तिं दत्ते क्षयविगलितां शर्मवलदा
मतो ज्ञानं ज्यायस्तदिव न हि किञ्चिच्छुचितमम्


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५०

स्वबन्धोस्तच्छ्रुत्वा ह्यनुजसकला मोदमगमन्
अभूवन् सर्वे ते परमसुखिताः शान्तहृदयाः
अपारज्ञानानां निधिरनुपमो मङ्गलमयो
रुचिं प्राशंसत् तामनुजनिवहस्यावधपतिः

५१

अथ स्वीयाः सीता शशधरमुखी देवरवधूः
प्रियाः शोभां रम्यां निगदितुमितो व्याहृतवती
निदाघस्य स्वान्ताधिकसुखकरीं सत्सहृदयाः
प्रियज्येष्ठायास्तद् वचनमकरोत् ताः सुमुदिताः

५२

निदाघर्तुः प्रातर्भ्रमणरुचिशीलान् सुखयति
लतानां वृक्षाणां कुसुमसुरभिं चाददसौ
नितान्तं प्रीणाति प्रियशुभगुणो मानवजगद्
वधूः सौमित्रेः प्रागचकथदिदं तत्र सुभगा

५३

मनुष्याः सानन्दं सरसि सरिति स्नान्ति च चिरं
विहारं सुन्दर्यः प्रमुदिततरा नीरसुखदे
व्यवस्थाभिः सार्धं विदधति च शुक्रे समुचितं
भृशं क्रीऽन्त्यस्ताश्चरमसुखमायान्ति सुभगाः

५४

युवानः सुन्दर्यो मुदितमनसा पुष्पविविधैः
वहु प्रीत्या हृद्यं चिकुरनिकरं नैकविधिना
निजग्रीवां वक्षः स्वकरयुगलं प्रेमबहुना
ह्यलङ्कुर्वन्तीह प्रियतरनिदाघे प्रतिदिनम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



५५

उदीर्यैतत् प्रीत्या भरतदयिता मौनमगमत्
ततः शत्रुघ्नस्य प्रियसहचरी प्रीतमनसा
जगादैतत् तत्राधिकमधुरवाक्यं सविनयम्
अयं ग्रीष्मः कालोऽनुपमसुषमां पोषयति च

५६

जनाञ्च्छीतं पीयं मधुरमधुरं प्रीणयति च
सितायुक्तं क्षीरं हिमसुरभिशुभ्रं मधुरसं
रसालं नादेयीं प्रचुरगुणजम्बीरसरसं
गृहीत्वा ते ग्रीष्मे किमपि बहु विन्दन्ति च सुखम्

५७

निशाज्योत्स्नाकान्ता सितहरितकौशेयवसनं
तरुच्छाया सान्द्रा हिमलयतमः सेविसदनं
नदीकूले सायं कुसुमललितोद्यानविमले
भृशं चित्तं प्रीणात्यवनिमनुजानां विचरणम्

५८

निशम्यैतत् सर्वं जनकतनया मोदमगमत्
बहुस्नेहेनासौ कमलवदना देवर वधूः
नितान्तं प्राशंसद् विमलधिषणां काव्यसुरुचिं
पुनस्तासां सौधं प्रकृतिविनता साप्यभिययौ

५९

प्रियो न्याय्याचारः सकलजनतासीत् सुचरिता
दुराचारो नासीदखिलवसुधाभूत् सुखवती
हरौ भक्तिं लोकः सततमदधाच्छद्मरहितां
प्रियं दृष्टं राज्येऽनिशमिदमहो श्रीरघुपतेः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६०

कदाप्येको गूढो रघुपतिसकाशे नतशिराः
उपेतः पृष्टोऽसौ चर इति तदा वाक्यमवदत्
अयोध्यायां राजन् सकलजनतास्ते सुखवती
पर पुर्यां वादो जनकतनयायां प्रचलति

६१

व्यधाद् वासं नक्तञ्चरपतिनगर्यां जनकजा
पुनः स्वीचक्रे तां रघुकुलरविर्हन्त दयिताम्
अयं वादस्तत्र श्रुतिपथगतोऽभूत् क्षितिपते
परीक्षाग्नौ जाता ह्यभवदतिदूरे वदति सा

६२

अयं निन्दावादो रघुपतिमनोऽत्यन्तमदुनोत्
तदीयं चित्तं सः पविरिव हिनस्ति स्म नितराम्
अपि श्रेष्ठः साधुः सुकृतपथगामी सुपुरुषो
न लोकेऽस्मिन् माष्टुं विहितमपवादं प्रभवति

६३

भवन् दुःखाक्रान्तो जनकबलिसौधं ह्यपगतः
पितुश्चित्रं दृष्ट्वा नयनयुगलं किञ्च हृदयम
अभूद् बाष्पार्द्रं सः प्रणतनिटिलोऽवन्दत च तं
स्वदुःखं तस्याग्रे परमशुचिचित्तो निहितवान्

६४

ततोऽसावम्बानां भवनमपि यातो धृतधृतिः
परं नो दुःखं सोऽकुरुत पुरतो व्यक्तममितम्
अवश्यं जातास्ता मनसि गुरुशङ्का मनसि च
नमस्कृत्यासौ ताः सदनमगमत् स्वं परवशः



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



६५

अहं जातो हेतुर्जनकतनयाया हि विपदाम्
अभीक्ष्णं मच्चित्तासहत परुषामापदमिह
नितान्तं कष्टं सा जनुषि ववरे भीषणवने
परं नो हित्वा मां सदनसुखदे संस्थितवती

६६

इदं तस्यां रात्रौ रघुकुलरविर्दुःखितमनाः
विचिन्त्यात्यन्तं सः सुजनगणगेयोऽत्र निपति
न निद्रां लेभेऽल्पामपि सुचरितो धर्मपथग
स्तदा सीतात्यागो हृदयमति चिन्तामगमयत्

६७

प्रभातश्री दिव्या क्षितिजपरिधौ रम्यसुषमां
वितन्वन्ती भूयो भुवनमखिलं स्वच्छविभया
नवाभाशुक्लिम्नि प्रमुदितमुखी वृद्धिमनयत्
क्षितीशं श्रीरामं जगदधिपतिं सेवितवती

६८

अथ ध्वान्तं सूर्यो निखिलवसुधाया विदलयन्
द्विरेफानुद्याने कुसुमललितेऽलं चपलयन्
मनोहृद्ये नीरे कमलदलवृन्दं तरलयन्
अवान्मन्दं मन्दं दिशि दिशि परागं च विकिरन्

६९

तदा तत्रायातां जनकतनयां रामरमणो
विलोक्यान्तनृवर्त्नीत्वमजनि च तस्या हृदि सुखं
ह्रियं गच्छन्तीं तां रहसि शरपीताभवदनां
प्रियां पप्रच्छाङ्के नवतदभिलाषं कृशतनूम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


७०

तदा सीतावोचन्मुनिऋषियुतं पुण्यविपिनं
तपःपूतं गङ्गातटसुविमलं सौम्यहरिणं
तरूणां छायाभिः कुसुमफलभाजां प्रियतरम्
अहं द्रष्टुं काङ्क्षां परमबलयुक्ताञ्च निदधे

७१

प्रिये सीते काङ्क्षा सपदि परिपूर्णा भवतु ते
इदं शंसन् रामो निजनगरशोभामनुपमां
सितप्रासादाद् द्राङ्नयनपथगां कर्तुमचलन्
नभश्चुम्ब्युत्तुङ्गादनुगजनपृष्टोऽम्बुजमुखः

७२

इद कार्यं बाह्यं विगतसुखचेता विहितवान्
तदा रामस्वान्तं निविडतमशोकाकुलमभूत्
इदानीं कि कार्यं किमिति न विचारे निपतित
स्ततोऽसौ बन्धून् स्वान् धृतधृतिमनाराह्वयत च

७३

तदा तेषामग्रे विहितमपवादं निहितवान्
कटुं सीतानिष्ठ ह्यनुजसकला खिन्नहृदयाः
अभूवन् सर्वे नो विमलमतयो वक्तुमशकन्
विरोधो वा पुष्टिर्न च समभवत् तस्य पुरतः

७४

परीक्षा चेदग्नावपि न विहिता पुण्यचरिते
प्रमाणं स्यादन्यत् किमिह जगतीति प्रगदितं
विनीतैः सर्वैस्तैरनुजमतितिग्मैः सविनयं
न कर्त्तव्योऽन्यायः सुकृतभृति चानागसि जने


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


७५

मतं सद्बन्धूनां निहितमभवन् नम्रवचनै
रिदं रामस्याग्रे विनयगुणभाजां शुचिहृदा
मयं राजर्षीणां रविभगवतो वंशविमलः
कलङ्केन म्लानो भवति मम हेतोरिति वदन्

७६

प्रभू रामो बन्धून् सजलनयनः प्रैक्षत तदा
विनां सीतात्यागं न च विमलवंशो मम गतो
कलङ्कात् स्याद् रक्ष्यो विपदियमतो धीरमतिभिः
भवद्भिः संसह्या प्रणतवचसाऽसावभिदधौ

७७

ततो दुःखी भूत्वा भरतदिशि दृष्टिं निहितवान्
विनीतः शत्रुघ्नः समुचितवचोमार्दवमयं
न बन्धो! युक्तं नः सुकृतपथगां भ्रातृदयितां
वने त्यक्तुं राजन् श्रुतिनयसुरक्षी भुवि भवान्

७८

वने त्यागस्तस्या अघजलधिपाती कुगतिकृन्
मतः सर्वैर्बन्धुप्रथितनयमार्गैः सुकृतिभिः
नयन्-रामो वेश्म प्रियमनुजसौमित्रिमथ तं
न्यगादीन्नेतुं तामृषिसुरनदीदर्शनरुचिम्

७९

तपःक्षोणीविद्वद्‌ऋषिसुरनदीदर्शनरुचिम्
अवादीत् सीता मामनुज निजकाङ्क्षां बहुफलाम
अनेन व्याजेन त्वमतिशयपुण्यां जनकजां
वनं नेतुं योग्यः प्रवरमुनिवाल्मीकिवसतिम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



८०

भवन्दुःखक्लातो विपिनमनयल्लक्ष्मणरथी
समारोप्य द्राक् ता रथसुखमये बन्धुदयितां
वनं चागम्यासावमरसरितं तत्र झटिति
कयाचिन्नावा तच्छुचितरतटं प्राप्तमकरोत्

८१

यतः श्रीवाल्मीकेर्विदिततपसश्चाश्रमपदं
विरेजे सान्निध्येऽश्रुकणनयनो दुःखितमनाः
प्रियां बन्धोः सीतां नृपतिकथितं त्यागकठिनं
तदा त्यागोद्देश्यं परिमितपदैश्चाभिहितवान्

८२

असह्यां पीडां सा मृदुलहृदया रामदयिता
ययौ ज्ञात्वा त्यागं सपदि च गता मूर्च्छितदशां
नितान्तं मुञ्चन्ती नयनजलधारां जनकजा
स्वभाग्यं निन्दन्ती कतिपयपदां वाचमवदत्

८३

विशुद्धां लब्ध्वाग्नाववनिरमणो मामतितरां
समक्षं सर्वेषां जनविहितवादं श्रुतिगतं
विधायामुञ्चन्मां रविकुलमतो वा श्रुतिमतो
भवांस्त्यागो राजन् मम वदतु मां साम्प्रतमयम्

८४

न सन्ति प्राणा मे कथमपि च रक्ष्याः प्रियतराः
ममोपेक्षायोग्या मयि यदि भवेन्नो स्थितिगतं
तदीयं मे रक्ष्यं परमशुभतेजः शुचितमम्
इदं दुःखात्यन्ताद् व्यथितहृदयोक्त्वा शुचमयाद्



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


८५

नृपस्योक्तो धर्मो मनुभगवता रक्षणपरः
समेषां वर्णानामृषिमुनितपोलीनमनसाम्
अहं त्यक्ता भार्यापि न किमिह रक्ष्या नृपतिना
वद त्वं मद्वाक्यादवनिरमणं देवर मम

८६

मम श्वश्र्वः सर्वाः मम च सकला देवृदयिताः
भवत्यो नारीत्वाद् युवतिजनपीडां मम भृशम्
अहो जानन्तीमां न च किमपि वाच्यं हि वचनम
अनुक्रोशं यूयं त्यजत मयि सर्वाः न सदयाः

८७

तथेत्युक्त्वा दुःखी सजलनयनस्तां वनगतां
विहायायाञ्चक्रे कुलिशहृदयो लक्ष्मणबुध
स्ततः सीता भीता दलितहृदया काननगतान्
स्वदुःखे जीवान् सा सपदि सकलान् पातितवती

८८

कुशेध्मानाहर्तुं रुदितमशृणोत् काननमितो
महर्षिर्वाल्मीकिर्झटिति सविधे वीक्ष्य सदयः
समायातस्तस्या व्यथितहृदयोऽभूत् कृशतनूं
स्थितिं ज्ञात्वा स्निग्धो मधुरवचसा तामभिदधौ

८९

स्थितिर्ज्ञाता ध्यात्वा न तु गमय चिन्तां स्वहृदयं
पतिः खिन्नो भूत्वानृतकथनमाकर्ण्य तनये
कृता त्वं सन्त्यक्ता त्वयि न कुपितं तस्य हृदयम्
अवेह्यायाता त्वं जनकसदने सम्प्रति सुते



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


६०

ततस्तामादायाश्वसितहृदयामाश्रमपदम्
महर्षिर्वाल्मीकिः सुखितमृगवृन्द बहुतरुं
निवासार्हैः पूतैरुटजबहुभिः शोभिततररम्
इय पोष्या रक्ष्या विविधविधिभिः स्नेहसरसैः

६१

इदं प्रीत्योक्त्वासावृषिजनवधूष्वार्पयत ताम्
इमाः कन्याः सीताहृदयसुखदाः स्युः प्रतिदिनं
वसन्त्यः सेवेरन् मुदितमनसा तामनुपलं
प्रसन्ना त्वं सीते वस सनियमावोचत मुनिः

६२

उपेतः सौमित्री रघुकुलरवेश्चापि सविधे
यदुक्तं तत्सर्वं जनकसुतया खिन्नहृदयो
भवन् रामे प्रोचे सजलनयनः श्रीरघुपते
स्तदा धाराश्रूणां नयनयुगलात् तस्य पतिता

६३

कृतात् सीतात्यागादनुजदयिताः क्लान्तहृदयाः
जनन्यश्च क्लान्ता दिवससकलं रात्रिमरुदन्
न वा बन्धुर्दृष्टो मुदितवदनः कोऽपि भवने
अभूवन् प्रासादा विगतहसिता भूमिभवने

६४

असह्यं स्वं शोकं कथमपि च कृत्वा हतबलं
शशास स्वं राज्यं कृतवशरजाः सन् रघुपति
र्जनानां रक्षायामवहितमना लोचनगतो
ह्यभूल्लोके रामो भवजनहितस्वान्तनृपतिः


Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



९५

इत्तः कृत्वा स्नानं प्रतिदिवसमातिथ्यहृदया
व्यधादर्चां सीता नियमविधिना श्रीपतिहरेः
वसाना चासक्ता तपसि नियता वल्कलपटं
शरीरं स्वं भर्तुः कुलहितदृशा धारितवती

९६

यथाकालं सीता तनययुगलं रूपमधुरं
दधाना तेजः सद्विमलबलवन्तं प्रसुषुवे
महर्षिर्वाल्मीकिर्मुदितमनसा शास्त्रविधिना
ह्यकार्षीत्संस्कारं रुचिरमुभयोराश्रमपदे

९७

मुदा नार्यो बालाः सकलशिशवश्चाश्रमपदे
तपोनिष्ठा वृद्धाः सकलमुनयः पक्षिहरिणाः
लतावृक्षाः सर्वे तनयजनुषि स्नेहमनसा
वितेनुश्चाह्लादं महसि महति प्रेमविपुलाः

९८

ऋषिर्नाम्ना चक्रे तनययुगलं तत् कुशलवा
विति प्रीत्या काले शुभमुचितसंस्कारमकरोद्
व्यधाच्छस्त्रे शास्त्रे परमकुशलौ तीक्ष्णधिषणौ
ततःप्रेम्णा रामप्रियचरितगाने च निपुणौ

९९

यथाकालं विद्वान् परमविपुलश्रीविलसित–
समारोहं चक्रे सुभगरुचिरं तत्र च मुनि
र्नृपं रामं सार्धं तदनुजसुधीभिश्च जनतां
वसिष्ठं मन्त्र्यादिं मुनिविसरमामन्त्रितमसौ



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



१००

समारोहे तस्मिन् प्रियलवकुशौ रामतनयौ
उभौ रामाकारौ कमलवदनौ पद्मनयनौ
मुदा तेजोवन्तौ मधुरमधुरं रामचरितं
मनोज्ञं गायन्तौ हृदमहरतां रामनृपतेः

१०१

अभूवंस्तत्रत्याः सकलमुनयो बन्धुनिवहो
जना विद्वद्वर्गः प्रमुदितहृदो गीतिमधुरां
प्रसन्नाः श्रुत्वा ते प्रियलवकुशौ तुष्टुवुरलम्
इमौ कौ जिज्ञासां मनसि सुखदां चक्रुरिति

१०२

महर्षेर्वाल्मीकेः स्वशिरसि तदाज्ञां निदधती
यदा मञ्चं सीता सह लवकुशाभ्यामकुरुत
सनाथं दृष्ट्वा तां रघुपतिमनोऽत्यन्तमधिनोत्
अहो सीतेयं मे हृदयदयिता जीवनसुधा

१०३

यदौत्सुक्यं चैतत् विततमभवत् तत्र मुनिना
सतीत्वं सिद्धं त्वं कुरु मम सुते व्याहृतमिति
भवन्ती सा ग्लाना निगदितवती मातृवसुधे
भव त्वं दीर्णा मां कुरु सपदि चोत्सङ्गनिहिताम्

१०४

सति प्रोक्ते चैवं परमविमलज्योतिरुदगात्
क्षितेः रन्ध्रात् सीता विहितविवरोत्सङ्गसुखदे
ममौ रामो हा हा व्यथितहृदयो व्याहरदिति
इदं दृश्यं भूत्वा परमचकितं प्रैक्षत जगत्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.


१०५

गतायां सीतायां दशरथसुतो राम इह नो
चिरं वासं चक्रे सुतकुशलवौ बन्धुतनयान्
स्थितान् कृत्वा चापि प्रकृतिविनतानष्टसु पृथक्
पृथग् राज्येषु द्राग् दिवमभिययौ बान्धवयुतः

१०६

न राजा लोकेऽस्मिन् स इव जनसंरक्षणरतो
बभौ, न्याय्यां वृत्तिं सुकृतविटपं धर्मसुहृदं
सदारक्षत् प्रीत्या श्रुतिरतमनाः शीलसुभगः
स मर्यादारक्षी प्रतिदिनमपुष्णाच्च जगतीम्

१०७

न चासंस्तद्राज्ये क्वचिदपि रुजाचौरविपदो
दुराचारी नासीन्न च कपटरागी कुचरितो
धरा धान्यं नित्यं प्रचुरमददाद् वृक्षलतिकाः
फलाढ्याः सम्पन्नः सततमभवल्लोकसकलः

१०८

अभूदिष्टा वृष्टिस्तपसि यशसि प्रीतिमवहन्
जना ज्ञानोद्दीप्ता हरिचरणभक्ताः सुरुचयो
न भीतिश्चेतिभ्यः क्वचिदपि न नाधिर्मलिनता
न दारिद्र्यं वा दुर्व्यसनमभवत् तस्य विषये

१०९

कल्याणानां निधानं गुणबलसदनं धाम चारित्र्यलक्ष्म्याः
विद्यानामेकतीर्थं दुरितदलमकृद् ज्ञानतेजोऽवदातं
धर्मारूढं पवित्रं मुनिजनजगतः पालकं पुण्यवन्तं
दीनोद्धारप्रसिद्धं गुरुजनवचनस्वान्तरामं नमामि

इति श्रीरमेशचन्द्रशुक्लकृते सुगमरामायणे महाकाव्ये रामस्वर्गारोहणं नाम चतुर्दशः सर्गः। समाप्तञ्च महाकाव्यमिदम्।

० शुभम् ०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# कविपरिचयः

| | | |
|---|---|---|
| नाम | : | रमेशचन्द्र शुक्लः |
| जन्मतिथिः | : | १५.१०.-१६०६ ई० |
| जन्मस्थानम् | : | धौलपुरम् |
| पूर्वजावासः | : | रायबरेलीजिलान्तर्गतः दरसवाँग्रामः |
| शिक्षास्थलानि | : | मुरादाबाद—वाराणसी—खुर्जा— नगराणि |
| शिक्षा | : | एम.ए. (संस्कृते) साहित्याचार्यः सांख्य-योगाचार्यः (वाराणसीतः), पी-एच. डी. (अलीगढ़विश्वविद्यालयतः) |
| अध्यापनम् | : | वदायूँ- बरसाना -नन्दगाँव-- भरिया प्रभृतिषु स्थानेषु संस्कृतपाठशालासु आगराविश्वविद्यालयसम्बद्धालीगढस्थश्री वार्ष्णेयकालेजस्य संस्कृत-विभागे च चत्वारिंशद्वर्षपर्यन्तमध्यापनम् । १६७० ईशवीयेऽब्दे सेवानिवृत्तिः । |
| रचनाः | : | १६५६ तः लेखनमारब्धम् । प्रकाशिता रचनाः—१. प्रबन्धरत्नाकरः २. नाट्य-संस्कृतिसुधा, ३. गान्धिगौरवम् (उत्तर-प्रदेशासनपुरस्कृतम्), ४. लालबहादुर-शास्त्रिचरितम्, ५. भरतचरितामृतम्, (उत्तरप्रदेशशासनपुरस्कृतम्), ६. विभा-वनम्, ७. बंगलादेशः, ८. गीतमहावीरम् (उत्तरप्रदेशशासनपुरस्कृतम्), ६. संस्कृत-वैभवम् (सम्पादितम्), १०. संस्कृत-प्रबन्धप्रभा, ११. चारुचरितचर्चा १२. 'सुगमरामायणम्' प्रभृतयः । अप्रकाशिता रचनाः-बह्व्यः । |
| संस्कृत-संस्था-सेवा | : | अलीगढ़-संस्कृत-परिषदः संस्थापक मन्त्री (१६५६–१६७०) 'देववाणी—परिषद्, दिल्ली'—संस्थायाः संस्थापकाध्यक्षः (१६७६–७७) |
| साम्प्रतिकं जीवनम् | : | अध्ययनलेखनेश्वरचिन्तनपरम् |

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

# शुद्धिका

(मुद्रणस्खलितानां परिमार्जनार्थमिह शुद्धिपत्रं प्रदीयते। प्रथमम् अशुद्धरूपं, ततः शुद्धरूपं, तदनन्तरं पृष्ठसंख्या तदुत्तरञ्च पंक्तिसंख्या दीयन्ते।)

चो-चो १७/५, त्विदांनीम-त्विदानीम् १८/१२, राजन-राजन् १६/१३ कोविदष-कोविदेषु २०/८, ममेंदम-ममेदम् २०/१२, महर्ष-महर्षे २१/१ घ्नर्नति-घ्नन्ति २८/५, लक्ष्मणं-लक्ष्मणं २६/१०, लक्ष्मण-लक्ष्मणं ३०/१३, क्रुद्ध-क्रुद्ध ३१/१, मुनिवरश्च-मुनिवरैश्च ३१/८, सादरम-सादरम् ३३/१८, विस्तारः-विस्तरः ३५/११, स्वयबर-स्वयंवर ३५/१४, सज्य-सज्यं ३६/३, विश्रूताः-विश्रुताः ३६/८, चाप-चापं ३८/५, कृतिपरिणयान्-कृतपरिणयान् ३६/६, जननी-जननीं ४०/१५, मनोज्ञ-मनोज्ञे ४१/४, जीवन-जीवने ४१/८, नी-नो ४१/१४, ध्वसने-ध्वंसने ४२/७, ध्वस्ता-ध्वस्ता ४२/१५, सेव्य नित्य-सेव्यं नित्यं ४३/४, रतेजो-स्तेजो ४३/७, ऋपिवर-ऋषिवर ४३/१६, वुघ्न-ब्रघ्न ४४/८ ससुचित-समुचित ४४/१३, कुञ्जरै-कुञ्जरैः ४५/२, निझरः-निर्झरः ४५/३, युक्तये-युवत्ये ४५/१३, राज्ञी-राज्ञ्यौ ४६/७, राज्ञी-राज्ञ्यौ ४६/६, ह्यर्मिला-ह्युर्मिला ४६/१०, स्मरन्त्यी-स्मरन्त्यौ ४६/१३, येरुपायै-यैरुपायै ४७/३, वसिष्ठ-वसिष्ठं ४७/५, नमशत्रुघ्न-नामशत्रुघ्न ४८/४, सेव्यीं-सेव्यां ४८/६, गोभिवहु-गोभिर्वहु ४८/१६, विस्मय-विस्मयं ४६/८, वचर-विचार्य ७३/१६, दिदृक्षूः-दिदृक्षुः ७२/१८, दशमः-नवमः ७५/शीर्षक, उमो-उभौ ७०/५, वुभ-वुप ७५/७, तो-तौ ८६/१३, सम्प्रपितौ-सम्प्रेषितौ ८६/१४ गुप्तैश्चरे-गुप्तैश्चरैं ८६/१६ वाग्मी-वाग्मी ८६/६, कोऽयम-कोऽप्य ६०/११, ताम्याम्-ताभ्याम् ६ /२०, (१) जात-जात ६१/१, रमिषिक्त-रभिषिक्त ६८/५, रिपु-रिपुं ६८/७, वाली-वालि ६६/१४, तस्यौ-तस्थौ १००/८, चित्त-चित्तं १०१/२, मह-महं १०२/७, तस्मश्च-तस्मिंश्च १०४/१७, (१) वल-बल ११३/१०, दिव्य-दिव्यं ११६/२, निश्चय-निश्चयं ११६/१८, बल्लभस्य–



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वल्लभस्य १२५/१३, जह्ल-जह्नु १२६/६, लायुध-लायुध १३०/३, वलौध-वलौघ १३१/६, प्रताड़िता:-प्रताडिता: १३१/१४, न्मत्र-न्मित्र १३६/८, नभःस्वतनय-नभःस्वत्तनयं १३७/४, वन्घु-वन्धु १३७/८ सम्भार्ग्य-सम्मार्ग्य १३७/१६, विध्वंस-विध्वंस १३७/१८, दग्घु-दग्धुं १३८/८, क्षतापतौ-क्षमापतौ १३९/४, हनुतांस्ततो-हनुमांस्ततो १३८/६, द्धुना-दधुना १३९/१८, सह्यया-सह्य १३९/२०, वरूथिनीं-वरूथिनीं १४०/२, जलघं-जलधे १४०/६, वीराग्रर्णा-वीराग्रणी १४३/११, बलवन्-बलवान् १४३/१२, बलौघो-बलौघो १४५/७, स्तनयः-स्तनयै १४६/७, वन्घु-वन्धु १४७/२, पूर्वक्रम्-पूर्वकम् १४७/१६, दयादिघे-दयानिधे १४८/१३, दुबुद्धि-दुर्बुद्धि १४९/८, घतुं-घर्तुं १४९/६, रामो-रामो १५०/३, ब्रुतो-ब्रूतो १५१/७, स्यकीयं-स्वकीयं १५४/४, वशे-वंशे १५५/७, बीर-वीरं १५८/५, प्रजघा-प्रजंघा १५६/१४, यतत्से-यतसे १६३/१६, स्वबन्धं-स्वब-धुं १६५/२०, बधार्थु-बधार्थं १६८/१३, भराद्यि-भराद्य १७५/१४, न्यायातुराग-न्यायानुराग १८६/८, सिन्धून् सि-धून् १८८/१२, सवै-सर्व १९०/१, यातुं-यांतु १९०/५, रव-रव १९३/४, प्रिय-प्रिये १९३/७, भागियी-भगिनी १९५/६, रघूकूल-रघुकुल १९५/७, व्यर्धु-व्यधु १९८/५, गुरुतरे-गुरुतर १९८/११, निघि-निधि १९८/१६, शशमृत्-शशभृत् १९९/४, प्रौणा-प्रीणा १९९/५, श्रीरात श्रीरामं १९९/१७, वक्तू-वक्तु १९९/१९, रघूकुल-रघुकुल २००/१२, मटन-मटन् २०१/३, सच्चित्रत्तद्-सच्चित्तद् २०१/४, ज्ञान-ज्ञानं २०१/६, क्रीऽन्त्य-क्रीडन्त्य २०२/१६. पर-परं २०४/४, पति-पतिः २०५/६, न्तनृर्वत्नी-न्तर्वत्नी २०५/१४, न्पायः-न्यायः २०६/२०.

:—:

भासतां भारते संस्कृतं सन्ततं
राजतां राष्ट्रभक्तिर्नृणां मानसे
द्योततां सर्वदा श्रीः क्षमायां मुदा
वर्ततां राघवानुग्रहोऽस्मिञ्जने

●



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi